*vindhyavāsī-bādarāyaṇośanaḥ śālihotravidhuguptasuśrutān ।*
*pīlukāryanṛpaputradevalān bhārgavīyabijavāyakāśyapān ।।*

— *Adbhutasāgara*, Upodghāta

**Table 17.1: Astronimical Manuscripts at ORI**

| *Sl. No.* | *Manuscript No.* | *Title* |
|---|---|---|
| 29256 | P.10387/3 | Indracāpaphala |
| 29259 | P.10440/3b | Indracāpaphala Ṭīkā |
| 29371 | B.586/4 | Uparāgacintāmaṇi |
| 30123 | P.3804/18 | Grahayuddhaphalam |
| 31512 | A.47/19 | Pitāmaha Saṁhitā |
| 31979 | P.9942/4 | Mahā Saṁhitā |
| 32850 | P.4665 | Vṛddhagārgya Saṁhitā |
| 32853 | P.4880/2 | Vṛddhayāvanam |
| 32854 | P.5955/17 | Vṛddhavāsiṣṭham |
| 330120 | P.5048/1 | Saṁhita Śiromaṇi |
| 31182 | P.7629/1 | Nāradīya Saṁhitā |

Our knowledge is limited only to the published books. Some of them are still in the form of manuscripts in various centres in India like ORIs (oriental research institutes). Table 7.1 shows names of some unpublished manuscripts available at ORI Mysore.

Saṁhitā texts are less studied and little famous among the people due to which not much research is done upon Saṁhitā texts of Jyotiṣa Śāstra. Today modern science has totally failed to predict disasters, so they just do disaster management after they take place. Our ancient seers, saw the nature as a living element and they went up to every basic reason behind every change in the nature, and after a deep and long time of observation they found many methods of predicting natural disasters as well. After studying the available Saṁhitā texts, I acknowledge various natural disaster prediction methods they had put in place.

**Ancient Disaster Prediction Methods (Āpadāṁ Prācīna Pūrvānumānavidhayaḥ)**

- *grahacāraḥ* (transits of planets)
- *grahavarṇaḥ* (colour changing of planets)

- *grahayuddhaḥ* (planetary wars)
- *grahodayāstaḥ* (rise and set of planets)
- *grahaṇam* (eclipse)
- *pratisūryaḥ* (monk suns)
- *rohiṇī-śakaṭa bhedaḥ* (Rohiṇī-Sakaṭa-bheda)
- *ulkāpātaḥ* (rings of meteors)
- *sūryacandrapariveśaḥ* (characteristics of halos)
- *digdāhaḥ* (glow at the horizon)
- *vidyuttaraṅgaḥ* (light)
- *meghākṛtiḥ* (cloud formation)
- *ativṛṣṭiḥ anāvṛṣṭiḥ pāṁśuvṛṣṭiḥ*
  (various types of rainfall)
- *indrāyudham* (signs of rainbow)
- *śakunam* (omens through birds and beasts)
- *tāmasa kīlakaḥ* (role of sunspots)
- *candraśṛṅgaḥ* (horns of moon)
- *gandharvanagaraḥ* (signs of aerial city)

**Grahacāra (Transits of Planets)**

Transit of planets in various *nakṣatra*s indicates disasters on the planet. These days astrologers use this method and some of them made very accurate predictions also.

*bhitvā maghāṁ viśākhāṁ bhindan bhaumaḥ karoti durbhikṣam* ।
*makaraṁ karoti ghoraṁ yadi bhitvā rohiṇīṁ yāti* ।।
— *Bṛhat Saṁhitā*, Bhaumacārādhyāya, *śloka* 9

If Mars transit from Maghā to Viśākhā *nakṣatra*, it creates famine in the world.

*saumyatvāṣṭra śraviṣṭhāsu sthite saure mahīsthitāḥ* ।
*sarve pīḍāṁ samṛcchanti janā yānti yamālayam* ।।
— *Adbhutasāgara*, p. 241

A study done by seven scientists (Ioannis Pappos, Konstantinos Raikakos, Basiaka Eirini, Tsixli Anastasia, Moumtzidou Panagiota, N. Tselikas and A.C. Boucouvalas) from Department of Telecommunications, Science and Technology, University of Peloponnese, Tripoli, Greece in their research demonstrated that nearly all of the significant earthquakes (7+ Richter) between 2004 and 2011 have occurred on dates of planetary alignments within k1 day. Table 17.2 lists the planetary alignment of 8+ Richter earthquakes.

### Grahavarṇa (Colour Changing of Planets)

In Saṁhitā texts it is described that if colour of planets looks different from their normal colour that will create problem in various areas.

*aṇḍajahā ravijo yadi citraḥ kṣubdhayakṛdyadi pītamayūkhaḥ* ।
*śastrabhayāya ca raktasavarṇo bhasmanibhau bahuvairakaraśca* ॥

— *Bṛhat Saṁhitā,* Śanaiścarādhyāya, *śloka* 20

**Table 17.2: Planetary Alignments of Specific 8 + Richter Earthquakes**

| Date | Alignments | Magnitude | Deviation Region |
|---|---|---|---|
| 03.11.2011 | Jupiter–Mercury–Saturn | 9 | Near East Coast Honshu, Japan |
| 27.02.2010 | Jupiter–Sun–Earth | 8.8 | Offshore Maule, Chile |
| 29.09.2009 | Earth–Moon–Jupiter | 8.1 | Samoa Islands Region |
| 09.12.2007 | Jupiter–Earth–Venus | 8.4 | Southern Sumatra, Indonesia |
| 04.01.2007 | Mercury–Sun–Earth | 8.1 | Solomon Islands |
| 13.01.2007 | Jupiter–Mars–Mercury | 8.2 | East of Kuril Islands |
| 15.11.2006 | Jupiter–Venus–Earth | 8.3 | Kuril Islands |
| 28.03.2005 | Earth–Mercury–Sun–Venus | 8.6 | Northern Sumatra, Indonesia |
| 26.12.2004 | Moon–Earth–Mercury–Venus–Mars–Venus–Sun | 9.3 | Off West Coast of Northern Sumatra |

When Saturn looks like pinto colour in the sky that creates problems related to birds. The same condition happened when "bird flue" spread in the world.

> *śikhibhayamanalābhe śastrakopaścarakte*
> *Kanakanikaṣagaure vyādhayo daityapūjye* ।
> — *Bṛhat Saṁhitā*, Śukracārādhyāya, *śloka* 44

When Venus looks like fire colour that creates fire disasters in the world, and if blood colour causes war in the world.

### Grahayuddham (Planetory Wars)

Ancient seers like Parāśara described four types of planetary wars in all Saṁhitā and Siddhānta texts: 1. *bheda,* 2. *ullekha*, 3. *aṁśumardana*, and 4. *apasavya*. Effect of war between different planets also showers problem in various areas.

> *guruṇā jite 'vanisute vāhlīkāyāyino 'gnivārtāśca* ।
> *śaśijena śūrasenāḥ kaliṅgaśālvāśca pīḍyante* ।।

If Mars is defeated by Jupiter it will cause problems in Vāhlīka area, and if it is defeated by Mercury it will cause problems in Śūrasena, Kaliṅga and Śālva areas.

### Grahodayāsta (Rise and Set of Planets)

Rise and set of planets due to sun also indicates the disasters on earth. If Venus set or rise in Kārttika month, there will be no rain for three months:

> *akāle uditaḥ śukraḥ prasthito vā yadā bhavet* ।
> *tadā trisāṁvatsarikaṁ grīṣme vapetsarasu vā* ।।
> — *Bhadrabāhu Saṁhitā,*
> pañcadaśo 'dhyāyaḥ, *śloka* 5

Whenever Mercury rise, that causes problems on earth:

> *notpātaparityaktaḥ kadācidapi candrajo vrajatyudayam* ।
> *jaladahanapavanabhayakṛddhānayārghakṣayavivṛddhayai* ।।
> — *Bṛhat Saṁhitā*, Budhacārādhyāya, *śloka* 1

**Grahaṇa (Eclipse)**

Ancient scholars divided eclipses of sun and moon into ten different parts: *savya, apasavya, leha, grasana, nirodha, avamardana, āroha, āghrāta, madhyatama, tamo 'ntya.*

If two eclipses seen from the same place in between a month that will cause problem to the place:

> *sarvagrastau durbhikṣamarakadau pāpasandṛṣṭau* ||
> — *Bṛhat Saṁhitā*, Rāhucārādhyāya, *śloka* 27

> *yadaikamāse grahaṇaṁ jāyate śaśisūryayoḥ* |
> *śastrakopaiḥ kṣayaṁ yānti tadā bhūpāḥ parasparam* ||
> — *Sugama Jyotiṣa*, Saṁjñādhyāya, *Durbhikṣayogāḥ*

During the time of Mahābhārata war there were two eclipses seen in one *pakṣa* (period of fifteen days):

> *caturdaśīṁ pañcadaśīṁ bhūtapūrvaṁ ca ṣoḍaśīm* |
> *candrasūryāvubhau grastāvekapakṣe trayodaśīm* |
> *aparvaṇi graheṇobhau prajāsaṁkṣipayiṣyataḥ* |
> — *Mahābhārata,* Bhīṣmaparva 3.32

**Pratisūrya (Monk Suns)**

If two suns seen in the sky, that also creates problems.

> *yadyupasūryakamasyāṁ sandhyāyamarthanāśanaṁ pracuram* |
> *kṣitipatikalahaḥ śīghraṁ salilabhayaṁ vā bhavennūnam* ||
> — *Vasiṣṭha Saṁhitā,* Arkacārādhyāya, *śloka* 22

**Rohiṇī-śakaṭa-bheda**

Rohiṇī *nakṣatra* is a group of stars in the sky which seems like a cart. If any planet pass through these stars, specially Mars, Saturn and Rāhu, that causes problems on the earth,

> *vṛṣe saptadaśe aṁśe yasya yāmyo 'ṁśakadvayāt* |
> *vikṣepo 'bhyadhiko bhindyādrohiṇyāḥ śakataṁ to saḥ* ||
> — *Sūrya Siddhānta,* Bhagrahayutyadhikāra, *śloka* 13

*rohiṇī śakaṭamarkanandano yadi bhinatti rudhiro 'thavā śikhī* ।
*kiṁ vadāmi yadaniṣṭasāgare jagadaśeṣamupayāti na saṁśayaḥ* ।।
— *Bṛhat Saṁhitā*

CASE 1

Hiroshima: 6 August 1945 8:15 a.m. (Little Boy)

Nagasaki: 9 August 1945 11:01 a.m. (Fat Man)

Mars: 16 Ta 12' 57.75" , Rohiṇī

CASE 2

WTC: 11 September 2001 8:45:00 New York

Saturn: 20 Ta 58' 22.17", Rohiṇī

CASE 3

US Iraq War: 22 February 2003

North Node: 10 Ta 21' 12.86", Rohiṇī

Saturn: 28 Ta 14' 19.03", Mṛgaśirā

SOME OTHER EVENTS

Regina Cyclone: 30 June 1912 4:30:00 p.m. Regina, Canada (Saturn 6 Ta 47' 29.20")

Empire State Building Crash: 28 July 1945 9:40:00 a.m. New York (Mars 10 Ta 33' 49.67", Rohiṇī)

NASA Columbia mishap: 1 February 2003 14:00:00 (North Node 11 Ta 27' 41.94", Rohiṇī)

Bhuj Earthquake: 26 January 2001 8:46:00 (Saturn 0 Ta, 11' 36.60")

US Civil War: 12 April 1861 (Mars 14 Ta 24' 58.31", Rohiṇī)

Vietnam War: March–April 1972 (16 April Mars 20 Ta, Rohiṇī)

## Ulkāpāta (Rings of Meteors)

In ancient India scholars said asteroids as "Ketu" and described so many types of Ketus. Like:

*dhūmrākāraḥ supucchaśca ketuviśvasya pīḍakaḥ* ।।

*kṛttikāsu samudbhūto dhūmaketuḥ prajāntakṛt* ।
*saṁvartaketuḥ sandhyāyāṁ triśirā neṣṭadāruṇaḥ* ।।
— *Sugama Jyotiṣa*, Saṁjñādhyāya, *Durbhikṣayogāḥ*

In *Adbhutasāgara* of Ballālasen thousands of asteroids are described. Even the time period of their rise:

Vasāketu: 130 years

Kapālaketu: 125 years, 45 days

Kaliketu: 300 years, 9 months

Paitāmaha Calaketu: 115 years

Śvetaketu: 110 years

After studying *Adbhutasāgara* one can know for how long time they were observing the universe. Because a person can't see a comet two times in his whole life and hundreds of comets described in the text. Not even the years of their arise, but they also described the good or bad effect on the earth:

*divā patati yolkā sā hanyāddeśaṁ sabhūpatim* ।
*mahāśāntiṁ tatra kuryādamṛtāṁ viśvabheṣajīm* ।।
— *Adbhutasāgara*, Ulkādbhutāvarta, p. 561

### Śākunam (Omens through Birds and Beasts)

There are a number of evidences in many Sanskrit texts that various animals behave strangely before disasters. In *Bhaviṣya Purāṇa* it is written that there will be rain of frogs before disaster or a number of frogs will be seen on the area. Same behaviour was seen before the China earthquake. Even after the tsunami there were no dead bodies of animals found in the area. Varāhamihira also describes strange behaviour of many animals in *Bṛhat Saṁhitā*.

*sandhyādvaye 'pi maṇḍalamābadhnanto mṛgā vihaṅgā vā* ।
*dīptāyāṁ diśyathavā krośantaḥ saṁhatā bhayadāḥ* ।।
— *Bṛhat Saṁhitā*, Utpātādhyāya, *śloka* 67

If beasts sit together facing towards sunset direction, it is a sign of disaster.

*śvānāḥ prarudanta iva dvāre krośanti jambukā dīptāḥ* ।
*praviśennarendrabhavane kapotakaḥ kauśiko yadi vā* ।।
— *Bṛhat Saṁhitā*, Śivārutādhyāya, *śloka* 16

If dogs are weeping facing towards the sun and foxes are making noise near the city, and owls and pigeons enter the houses, that is also a sign of disaster.

*ūrdhvamukhā vilokante vindyājjanapade bhayam* ।।

*heṣante sūryamudvīkṣya tadā 'gnibhayamādiśet* ।
*anyo 'nyaṁ samudīkṣante heṣyasthānagatā hayāḥ* ।।
— *Bhadrabāhu Saṁhitā,* Caturdaśo 'dhyāḥ, *śloka*s 151, 170

If horses continuously make strange noise looking towards the sun or looking at each other, it indicates fear of the place.

**Tāmasakīlakam (Role of Solar Spots)**

In Saṁhitā texts sunspots are called as *tāmasakīlaka*s and also describe that whenever these kind of spots are seen on the sun surface, it will create problems to these areas:

*chidre 'rkamaṇḍale dṛṣṭe tadā rājavināśanam* ।
*ghaṭākṛtiḥ kṣudbhayakṛtpurahā toraṇākṛtiḥ* ।।
— *Sugama Jyotiṣa,* Saṁjñādhyāyaḥ, *Durbhikṣayogāḥ*

Those areas will be more affected where these sunspots are seen:

*yasmin yasmin deśe darśanamāyānti sūryabimbasthāḥ* ।
*tasmiṁstasmin vyasanaṁ mahīpatīnāṁ parijñeyam* ।।
— *Bṛhat Saṁhitā,* Ādityacārādhyāya, *śloka* 12

Historically, research has been conducted to link the eleven-year cycle of the sun to changes in human behaviour and society. The most famous research had been done by A.L. Tchijevsky, a Russian scientist, who presented a paper to the American Meteorological Society at Philadelphia in the late nineteenth century. He prepared a study of the history of mass human movement compared to the

solar cycle. He constructed an "Index of Mass Human Excitability" covering each year from 500 BCE to CE 1922. He investigated the histories of seventy-two countries in that period, noting signs of human unrest such as wars, revolutions, riots, expeditions and migrations, plus the number of humans involved. Tchijevsky found that fully 80 per cent of the most significant events occurred during the years of maximum sunspot activity. He maintained that the "exciting" period may be explained by an acute change in the nervous and psychic character of humanity, which takes place at sunspot maxima.

**Sūryacandrapariveśa (Characteristics of Hallows)**

Ancient Indian scholars observed the effect of the hallows of sun and moon very well. If hallow of sun is seen whole day there will be death of people due to hunger and disease at the place where it is seen:

*ādityapariveśastu yadā sarvadinaṁ bhavet* ।
*kṣudbhayaṁ janamāriñca śastrakopaḥ ca nirdiśet* ।।
— *Bhadrabāhu Saṁhitā,* Caturtho 'dhyāya, *śloka* 47

**Digdāha (Glow at the Horizon or Earthquake Light)**

This is a great field of interest now in modern science also that people see strange light before earthquake. This is described in our astrology books as *digdāha.*

*dāho diśāṁ rājabhayāya pīto deśasya nāśāya hutāśavarṇaḥ* ।
*yaścāruṇaḥ syādapasavyavāyuḥ sasyasya nāśaṁ sa karoti dṛṣṭaḥ* ।।
— *Sugama Jyotiṣa,* Saṁjñādhyāya, *Durbhikṣayogāḥ*

**Vidyuta Taraṅga (Light)**

Observation of various types of light can also indicate about the upcoming problems in the area.

*samantādyadi dṛśyeran dikṣu sarvāśu vidyutaḥ* ।

*saptarātraṁ mahāvarṣaṁ ghorañcaiva vinirdiśet* ।।
— *Mayūracitrakam*

If the light is seen in all the directions, that will cause flood and rain for seven nights.

**Meghākṛti (Clouds Formation)**

In *Bṛhat Saṁhitā* Ācārya Varāhamihira describes the special formation of clouds before earthquake:

*praharaṇasadṛśairjaladaiḥ sthagitaḥ sandyādvaye 'pi raṇakārī* ।
*mṛgamahiṣavihagakharakarabhasadṛśarūpaiśca bhayadāyī* ।।
— *Bṛhat Saṁhitā,* Ādityacārādhyāya, *śloka* 35

*calitācalavarṣmāṇo gambhīravirāviṇastaḍidvantaḥ* ।
*gavalālikulāhinibhā visṛjanti payaḥ payovāhāḥ* ।।
— *Bṛhat Saṁhitā,* Bhūkampalakṣaṇādhyāya, *śloka 17*

Since 1994, Zhonghao Shou, a retired Chinese chemist living in New York, has made dozens of earthquake predictions based on cloud patterns in satellite images and claims to have 70 per cent accuracy. Stress and friction in the ground can vaporize water long before the earthquake happens, according to Shou, and clouds formed through these mechanisms are distinctively shaped.

Shou predicted in August 1999, 7.0 magnitude quake in the Mojave Desert, east of Los Angeles. He studied cloud patterns and shapes. Also on 25 December 2003, one day before the Bam earthquake, Shou predicted an earthquake of magnitude. 5.5+ within 30 days over a fault line in Iran.

**Indrāyudha (Signs of Rainbow)**

If two or more than two rainbows are seen from a place that will give problem to the area.

*avanīgāḍhamacchinnaṁ pratikūladhanudvayam* ।
*nṛpāntakṛddhi bhavedānukūlyaṁ na tacchubham* ।।
— *Nārada Saṁhitā, Indracāpalakṣaṇādhyāya, śloka* 8

**Candraśṛṅga (Horns of Moon)**

If the horns of moon are affected by other planets that gives fear of weapons and starvation on the earth.

*yadā 'kāśe śṛṅgadvayamamṛtaraśmervidhivaśā-*
*dadhovaktraṁ vyaktaṁ dinakarakarāṇāmapagame* ।
*kharāṁśoḥ santāpānalaśataśikhābhirvikalitā*
*narā hāhākāraṁ diśi diśi lapanti kṣititale* ।।
— *Vanamālā*, Caturtho 'dhyāya, *śloka* 14

**Gandharvanagara (Signs of Aerial City)**

Structure like a city in the sky also causes problem for the place:

*gandharvanagaraṁ dikṣu dṛśyate 'niṣṭadaṁ kramāt* ।
*bhūbhujāṁ vā camūnāthasenāpatipurodhasām* ।।

*indracāpāgnidhūmābhaṁ sarveṣāmaśubhapradam* ।
*citravarṇaṁ citrarūpaṁ prakāradhvajatoraṇam* ।

*dṛśyate cenmahāyuddhamayo 'nyaṁ dharaṇī bhujām* ।
—*Nārada Saṁhitā*,
Gandharvanagaradarśanādhyāyā, *ślokas* 1-4

This phenomenon was seen in Russia in October 2009, and also in Montreal in 2011. This kind of city was seen in the year 1887 near New Holland, and the news was also in the newspapers. In *Harivaṁśa Mahāpurāṇa* it is described as a disaster-causing event.

**Ativṛṣṭi, Anāvṛṣṭi, Pāṁśuvṛṣṭi (Various Types of Rainfall)**

*sitena rajasācchannādiggrāmavanaparvatāḥ* ।
*yathā tathā bhantyete nidhanaṁ yānti bhūmipāḥ* ।।
— *Nārada Saṁhitā,* Rajolakṣaṇādhyāya, *śloka* 1

The phenomenon which indicates the killing of landlords.

During research period, I came to know precious ancient heritages in our astronomological (combination of astronomy and astrology) texts. Even after great revolution in modern science, there is no method for forecasting natural disasters. But after a deep and

practical study of these topics (which have mentioned above), we can give a new science to the world.

## References

*अद्भुतसागरः*, श्रीमद्बल्लालसेनदेवप्रणीत, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2006।

*अथर्ववेदसंहिता*, श्रीमत्सायणाचार्यविरचित, कृष्णदास अकादमी, वाराणसी, संवत् 2045।

*कादम्बिनी*, मधुसूदनजी ओझा, श्री मधुसूदन वैदिक विज्ञान प्रकाशक कार्यालय, जयपुर संवत् 1999।

*कृषिपाराशर*, पाराशरमुनिविरचित, चौखम्बा संस्कृत सीरीज, वाराणसी, 2003।

*कूर्मपुराण* (सचित्र, हिन्दी-अनुवादसहित), गीताप्रेस, गोरखपुर, संवत् 2065।

*नरपतिजयचर्यास्वरोदयः*, श्रीमन्नरपतिकविविरचित, चौखम्बा संस्कृत संस्थान, वाराणसी, संवत् 2061।

*नारदपुराण*, गीताप्रेस, गोरखपुर।

*नारदसंहिता*, नारदमहामुनिप्रणीता, चौखम्बा संस्कृत भवन, वाराणसी, संवत् 2065।

*नारदीय ज्योतिष*, डॉ. बिन्दा प्रसाद मिश्र, विद्यानिधि प्रकाशन, दिल्ली, 1998।

*बृहत्संहिता*, वराहमिहिरविरचित, चौखम्बा विद्याभवन, वाराणसी, 2009।

*ब्रह्मपुराण*, हिन्दी साहित्य सम्मेलन, प्रयाग, 1993।

*भद्रबाहुसंहिता*, डॉ. नेमिचन्द्र ज्योतिषाचार्य, भारतीय ज्ञानपीठ, 2009।

*मत्स्यपुराण* (सचित्र, हिन्दी-अनुवादसहित), गीताप्रेस, गोरखपुर, संवत् 2067।

*मयूरचित्रकम्*, देवर्षि नारदविरचितम्, चौखम्बा संस्कृत भवन, वाराणसी, संवत् 2065।

*मुहूर्तचिन्तामणि*, दैवज्ञ श्रीरामाचार्यविरचित, मोतीलाल बनारसीदास, 2008।

*मेघमाला*, भडली मेघराजनिर्मित, खेमराज श्रीकृष्णदास, मुम्बई, 2007।

*वनमाला*, जीवनाथ झा, चौखम्बा संस्कृत संस्थान, वाराणसी, संवत् 2046 ।

*वसिष्ठसंहिता*, ब्रह्मर्षिवृद्धवसिष्ठविरचिता, चौखम्बा संस्कृत भवन, वाराणसी, संवत् 2065।

*विष्णुधर्मोत्तरपुराण*, गीताप्रेस, गोरखपुर, संवत् 2062।

*सिद्धान्ततत्त्वविवेक*, श्रीकमलाकरभट्टविरचित संपूर्णानन्दसंस्कृतविश्वविद्यालय, 1996।

*सुगमज्योतिष*, पण्डितदेवीदत्तजोशी, मोतीलाल बनारसीदास, 1993।

*सूर्यसिद्धान्तः*, श्रीसूर्यमयासुरसंवादरूपः (आर्षः), चौखम्बा संस्कृत भवन, वाराणसी, 2006।

# 18

# मातृकापरम्परायां तम्मयज्वविरचितस्य कामदोग्ध्रीव्याख्यानस्य प्राधान्यम्

*गोपालकृष्ण हेगडे*

**खगोळविज्ञानस्य विशिष्टा परम्पराः**

इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।
विवस्वान् मनवे प्राह मनुरिक्षाकवेऽब्रवीत् ।। 1 ।।
एवं परम्पराप्राप्तम् इमं राजर्षयो विदुः ।।[१]

एवं यथा गीताचार्येण योगपरम्परा प्रदर्शिता तथा खगोळविज्ञानस्यापि महती विशिष्टा च परम्परा प्रतीयते समग्रे विश्वे। एतच्च खगोळविज्ञानं ज्योतिषशास्त्रान्तर्गतम्। खगोलः आकाशमण्डलमिति शब्दकल्पद्रुमकारः उल्लिखति।

अपरिमिते गगनमण्डले खगोले यानि हि तेजोमयानि बिम्बानि दृश्यन्ते तानि सर्वाण्येव समदृष्ट्या ज्योतिःशब्देन उच्यन्ते। तेष्वपि यानि सदैकसमगतीनि तानि नक्षत्रशब्देन, प्रतिदिनं भिन्नभिन्नगतीनि तु ग्रहशब्देन च ज्ञायन्ते। एवंविधनक्षत्रग्रहतारकादिज्योतिःपिण्डानां स्थितिगतिप्रभावादिवर्णनपरं शास्त्रमेव ज्योतिषपदेन अभिधीयते।

खगोळविज्ञानस्य अस्तित्वं वैदिकमन्त्रेषु सर्वप्रथमं विकीर्णरूपेण स्थितं द्रष्टुं शक्यते। यथा — ओं यत्पुण्यं नक्षत्रं तद्बत् कुर्वीतोपव्युषं यदा वै सूर्य उदेति अथ नक्षत्रं नैति यावति तत्र सूर्यो गच्छेत् यत्र जधन्यं पश्येत् तावति कुर्वीत यत्कारीस्यात् पुण्याह एव कुरुते। तानि वा यमनक्षत्राणि यान्येव देवनक्षत्राणि तेषु कुर्वीत यत्कारी स्यात् पुण्याह एव कुरुते।[२]

इत्येतैः वैदिकमन्त्रैः नक्षत्राणां मध्ये कानिचित् देवनक्षत्राणीति कानिचित्, यमनक्षत्राणीति

---

[१] श्रीमद्भगवद् गीता, चतुर्थाध्यायः, 1, 2 श्लोकौ ।

[२] कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणम् ।

प्रतिपादितानि महर्षिभिः। देवनक्षत्राण्येव पुण्यनक्षत्राणीति तेषां काल एव पुण्याहमिति च निर्दिष्टम्। बहुकालात्पूर्वं एतत्समयपर्यन्तमपि भारते वर्षे नक्षत्राणामेव प्राधान्यमुपदिष्टम्।

कृत्तिकानक्षत्रमग्निर्देवता, रोहिणीनक्षत्रं प्रजापतिर्देवता.........[३]

इत्यादिना सूर्यमार्गस्थितानां क्रान्तिवृत्तीयानां नक्षत्राणाम्, चन्द्रमार्गस्थितानां क्रान्तिवृत्तसमीपस्थत्वात् चन्द्रमार्गस्य च परस्परसम्बन्धः प्रतिपादितो दृश्यते। अयमेव विषयः वैपुल्येन नक्षत्रेष्टिरिति प्रसिद्धे प्रश्ने व्याख्यातो दृश्यते।

एवं खगोलसम्बन्धिचिन्तनमन्थनं वैदिकसंहितासु प्रस्फुटितं दृश्यते। पश्चाच्च नवनवानुभवसंयोजनपूर्वकं लौकिकग्रन्थेष्वपि। तेन हि खगोलशास्त्रस्य विकासः पञ्चसु अवस्थासु विभक्तो दृश्यते। प्राग्वैदिककालः, वैदिकसंहिताकालः, वेदाङ्गकालः, सिद्धान्तकालः, आधुनिककालश्चेति अथवा अज्ञातकालः, आदिकालः, पूर्वमध्यकालः, उत्तरमध्यकालः, आधुनिककालश्चेति। तस्मिन् काले मुद्रणयन्त्राणामनुपलम्भात् खगोलज्ञानप्रसाराय, प्रचाराय च मातृकाः एव प्रधानसाधनाः भवन्ति स्म ।

## दिव्यं ज्ञानमतीन्द्रियम्

खगोळविज्ञानं ब्राह्मं अतीन्द्रियं दिव्यं ज्ञानं वेदेषु निक्षिप्तं सत् अतिरहस्यं च वर्तते। एतादृशप्रत्यक्षसिद्धं ज्ञानं वसिष्ठादिमहर्षयः लोकोपकाराय स्वशिष्येभ्यः उपदेशयामासुः। तद्वारा पारम्पर्यक्रमेण एतद्रहस्यं अवनीं नीतवन्तः। अस्मिन् विषये प्रख्यातखगोळविज्ञानिनां भास्कराचार्याणां वचनं —

> दिव्यं ज्ञानमतीन्द्रियं यदृषिभिर्ब्राह्मं वसिष्ठादिभिः पारम्पर्यवशाद् रहस्यमवनीं नीतं प्रकाशं ततः इति।[४]

एवं ब्रह्मा नारदाय, सोमः शौनकाय, नारायणः वसिष्ठाय रोमशाय च, वसिष्ठः माण्डव्यवामदेवाभ्याम्, व्यासः स्वशिष्याय, सूर्यः मयाय अरुणाय च, पुलस्त्याचार्यगर्गात्रिरोमकाः स्वस्वशिष्येभ्यः, पराशरः मैत्रेयाय च प्रोचुः इति शास्त्रेतिहासाध्ययनेन ज्ञायते। एवं क्रमेण खगोळविज्ञाने गुरुशिष्यपरम्परा आसेतुहिमाचलं अद्यापि दरीदृश्यते।

अस्माकं पूर्वजैः अत्यमूल्यग्रन्थाः ताडपत्रेषु वा भूर्जपत्रेषु वा कर्गजपत्रेषु वा लिखितरूपेण संरक्षिताः दृश्यन्ते। इयमेव मातृका परम्परा। अस्यैव आङ्ग्लभाषायां Manuscripts Heritage इति कथ्यते।

---

[३] कृष्णयजुर्वेदीयतैत्तिरीयसंहिता 4.4.10 ।

[४] सिद्धान्तशिरोमणिः, गोलाध्यायः, ज्योत्पत्तिः, 9 श्लोकः ।

**खगोळशास्त्रप्रवर्तकाः**

सूर्यः पितामहो व्यासो वसिष्टोऽत्रिः पराशरः।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।।
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टादशैते ये ज्योतिःशास्त्रप्रवर्तकाः।।[५]

सूर्यादि अष्टादशज्योतिःशास्त्रप्रवर्तकाः स्वस्वनाम्ना ज्योतिषशास्त्रसम्बन्धि ग्रन्थान् रचयामासुः। ते सिद्धान्तरूपेण संहितारूपेण होरारूपेण च प्रसिद्धिं प्रापुः। ते एव अपौरुषेयशब्देन कीर्त्यन्ते। भारतीयानामस्माकं सर्वेषु धार्मिककृत्येषु रवेरेव प्राधान्यं विद्यते। सूर्य आत्मा जगतस्तस्थुषश्च इति वेदोक्त्या जडचेतनानां सर्वेषां वस्तूनां उद्भावकः रविरेवेति स्वीक्रियते। स एव रविः भारतीय-खगोळविज्ञानस्यापि प्रधानः प्रवर्तको विद्यते।[६] खगोळेऽपि स एव राजा इति तु प्रत्यक्षसिद्धमेव। अस्माकं सौभाग्यवशात् अस्य कृतिः सूर्यसिद्धान्तरूपेण अस्माकं हस्तगता विद्यते। सर्वेषामपि स्कन्धानां मूलभूतत्वात् सर्वदा युक्तिमत्वात् च सिद्धान्तस्कन्धः सर्वतः श्रेयानित्यत्र नास्ति सन्देहः। यतः

उपपत्तिमानागम एव प्रमाणमिति भास्कराचार्योक्तिः खगोलविज्ञानमधिकृत्यैव।[७]

**अष्टधा निर्गतं शास्त्रम्**[८]

एतच्च मत्तः शीतांशोः पुलस्त्याच्च विवस्वतः।
रोमकाच्च वसिष्ठाच्च गर्गादपि बृहस्पतेः ।।9।।

अष्टधा निर्गतं शास्त्रं स्वयं परमदुर्लभम्।

इति शाकल्यसंहितान्तर्गतब्रह्मसिद्धान्तोक्त्या ब्रह्मसोमपुलस्त्यसूर्य रोमकवसिष्ट-गर्गबृहस्पतिसिद्धान्ताश्चेति अष्टावेव सिद्धान्ताः आगमभूताः निगद्यन्ते। तेषु केचन ग्रन्थाः कालकबलिताः आसन्। केचन ग्रन्थालये मातृकारूपेणैव (manuscript) अप्रकटिताः सन्ति। अद्यत्वे केचन अपौरुषेयाः, केचन पौरुषेयाश्च अनेके सिद्धान्तग्रन्थाः अस्माकं दृष्टिपथमुपगताः भवन्ति।

खगोलविद्याविषये वदामश्चेत् भारतीयसिद्धान्ताः सिद्धान्ततन्त्रकरणभेदेन त्रिधा विभक्ताः दृश्यन्ते ।

---

[५] ज्योतिर्विज्ञानं पृष्टम् 5 (कश्यपवचनम्)।

[६] कृष्णयजुर्वेदीयतैत्तिरीयसंहिता 1.4.43.2 ।

[७] सिद्धान्तशिरोमणिः, ग्रहगणितम्, मध्यमाधिकारः, भगणाध्यायः, पृष्टम् 11।

[८] ब्रह्मसिद्धान्तः, प्रथमाध्यायः, 9, 10 श्लोकौ ।

खगोलविज्ञाने सन्ति बहवो हि ग्रन्थाः, शास्त्रस्यास्य प्रतिपादकाश्च। अद्यत्वे षष्ट्यधिकाः (60) पौरुषेयाः ग्रन्थाः सन्ति। खगोलविज्ञाने अत्यन्तप्राचीनः आर्षः सर्ववरेण्यः व्याख्यानुभूयिष्टः स्वयं सूर्येण प्रोक्तश्च ग्रन्थः सूर्यसिद्धान्तः इत्यत्र नास्ति विप्रतिपत्तिः। अत एव अस्य ग्रन्थस्योपरि आभारतं विपुलानि व्याख्यानानि समुद्भूतानि। श्रीमद्भगवद्गीतायाः अनन्तरं सूर्यसिद्धान्तस्यैव पञ्चाशत् (50) सङ्ख्याकानि अधिकानि व्याख्यानानि समुपलभ्यन्ते इतीदन्तु भारतीयानामस्माकं प्रमोदस्थानम्। अत्र त्रिंशदधिकाः व्याख्याः मातृकारूपेणैव स्थिताः सन्ति। ताश्च व्याख्याः तालिकारूपेण स्पष्टतया प्रदर्शिताः वर्तन्ते। इदानीं खगोलविज्ञानपरम्परायां तम्मयज्वविरचितस्य कामदोग्ध्रीव्याख्यानस्य प्राधान्यमधिकृत्य किञ्चित् प्रस्तूयते। सूर्यसिद्धान्तस्य उपलब्धासु व्याख्यासु अर्वाचीनेयमप्रकाशिता कामदोग्ध्रीव्याख्यापि अन्यतमा।

अर्वाचीनस्यास्य व्याख्यानस्य प्राचीनदेवनागर्यां तिगळारिलिप्यां, देवनागर्यां, कन्नडलिप्याञ्च हस्तप्रतयः (manuscripts) समुपलभ्यन्ते।

ऐतावत्पर्यन्तं कामदोग्ध्रीव्याख्यानसम्बन्धिमातृकाचतुष्टयस्य अध्ययनं कृतम्। तद्विवरणमुपस्थाप्यते। यथा —

मातृकोपलब्धिस्थानम् — प्राच्यविद्यासंशोधनालयः, मैसूर्, कर्णाटक

| | |
|---|---|
| पत्र संख्या — 1-282 | आकारः — 45 cm X 4.5 cm |
| पङ्क्ति संख्या — (पृष्टे) 8 | अक्षर संख्या — (पङ्क्तौ) 90 |
| लिपिः — प्राचीन देवनागरी | आधारः — ताड पत्रम् |
| क्रमाङ्कः — 3240 | विशेषः — सम्पूर्णम् |

मातृकोपलब्धिस्थानम् — सुब्रह्मण्यप्राच्यविद्यापीठम्, हस्तप्रतिसङ्ग्रहालयः, कवलकि 581334, होन्नावर, उ.क. कर्नाटक

| | |
|---|---|
| पत्र संख्या — 2-269 | आकारः — 33 cm X 20.5 cm |
| पङ्क्ति संख्या — (पृष्टे) 28 | अक्षर संख्या — (पङ्क्तौ) 25 |
| लिपिः - देवनागरी | आधारः — कर्गज पत्रम् |
| क्रमाङ्कः — 208 | विशेष — सम्पूर्णम् |

मातृकोपलब्धिस्थानम् — ग.कु. हेगडे स्मारकग्रन्थालयः, हेगडे-589330, कुम्टा, उ.क. कर्नाटक

| | |
|---|---|
| पत्र संख्या — 1-309 | आकारः — 23 cm X 30 cm |
| पङ्क्ति संख्या — (पृष्टे) 26 | अक्षर संख्या — (पङ्क्तौ) 30 |

लिपिः — कन्नड आधारः — कर्गज पत्रम्

क्रमाङ्कः — 72 विशेष — सम्पूर्णम्

मातृकोपलब्धिस्थानम् — श्रीकूगलबळ्ळी मठः, होसतोट, हेग्गरणि-581331, सिद्दापुर, उ.क. कर्नाटक

पत्र संख्या — 36-242 आकारः — 46.5 cm X 6 cm

पङ्क्ति संख्या — (पृष्टे) 10 अक्षर संख्या — (पङ्क्तौ) 54

लिपिः — तिगळारी आधारः — ताड पत्रम्

क्रमाङ्कः — 96 विशेष — असंपूर्णम् (1-35 पत्राणि न सन्ति)

कामदोग्ध्रीटीकायाः अस्याः उपलब्धासु मातृकासु हेगडे ग्रामस्थे ग.कु. हेगडे स्मारकग्रन्थालये संरक्षितां कन्नडलिपिमातृकां मूलमातृकारूपेण परिगणय्य तस्याः लेखनं कृतम्।

तम्मयज्वा टीकायाः अस्याः कर्तेति सर्वास्वपि मातृकासु उल्लेखो विद्यते। होन्नार्यस्य प्रपौत्रः, मल्लयज्वनः पौत्रः, वेङ्गटाम्बामल्लाध्वरिणोः पुत्रश्च आसीत् व्याख्यानकर्ता तम्मयज्वा। राजाज्ञा पित्राज्ञा च व्याख्यानकरणे मूलकारणमिति व्याख्यानकृता उल्लेखितम्। घनगिरिनिकटस्था परिशियुपुरी व्याख्यानस्थानमिति स्पष्टतया ज्ञायते। यथा —

> तत्र श्रीवेङ्कटपतिरायपट्टाभिषेकमुहूर्तसमये ममजनकस्य तत्रस्थिततान्त्रिकाणां च विवादो जातः। तत्समये श्री सूर्यसिद्धान्तस्य उदाहरणपूर्वकटीका यैः क्रियते ते महान्तः किं वृथा विवादेन इति राज्ञा सर्वैश्च निश्चिते ममपित्राज्ञया घनगिरिनिकटस्थपरिशियुपुर्यां सत्र्यंशत्र्यङ्गुलविषुवच्छायावत्यां हुताशक्षोणीरामाग्निपरिमितलम्बज्यावत्यां स्थित्वा मैलारेश्वरप्रसादजनितोऽहं श्रीसोमेश्वरप्रीतये होन्नमाम्बाप्रीत्यै च कामदोग्ध्रीं टीकां करोमि।। इति।[९]

ग्रन्थकृता निर्देशितमार्गानुसारेण परिचायकं चित्रं प्रदर्शितमस्ति। यथा — एतद् व्याख्यानावसरे भूमध्यरेखायाः प्राग्भागे दशयोजनान्तरिते लंकायाः उत्तरतो रामचन्द्रनयन 213 मितयोजनान्तरिते श्रीविद्यानगरस्य आग्नेयदिग्भागे श्रीशैलस्य नैर्ऋत्यदिग्भागे श्रीधनगिरिनगर्यां स्थितोऽहम्। इति।[१०]

अत्र भूमध्यरेखायाः प्राग्भागः, लंकायाः उत्तरभागः, श्रीविद्यानगरस्य आग्नेय दिग्भागः, श्रीशैलस्य नैर्ऋत्यदिग्भागश्च इदानीं कर्नाटकराज्यस्य कश्चनप्रदेशः भवति। अतः अयं दाक्षिणात्यः इति निश्चयेन वक्तुं शक्यते।

---

[९] कामदोग्ध्रीव्याख्यानम् ।

[१०] कामदोग्ध्रीव्याख्यानम् ।

**व्याख्यानकर्तुः कालः**

अस्य कालविषये स्पष्टोल्लेखः समुपलभ्यते। तथा — [११]अथ मदीयव्याख्यावसरात् पूर्वं त्रेतायुगम् 12,96,000 द्वापरयुगम् 8,64,000 कलियुगे युधिष्ठिरविक्रमशकयोः कालः 3979 शालिवाहनशककाले चन्द्राक्षिशरभूमितानि 1521 सौरवर्षाणि गतानि। एतेषां योगः 21,64,700। एतत् कृतयुगान्तसौराब्देषु संयोज्य जाता विकारिसंवत्सरचैत्रशुक्लप्रतिपदिसृष्ट्यादि अब्दाः 1,955,884,700। व्याख्याने एवमस्ति।

तदनुरोधेन ग्रन्थकालः निर्णीयते। यथा —

अस्मिन्वर्षे (खरसंवत्सरे) सृष्ट्यादिगताब्दाः = 1,955,885,112
कामदोग्ध्री व्याख्यानरचनाकाले सृष्ट्यादिगताब्दाः = 1,955,884,700
तयोरन्तरम् = 412 वर्षाणि
अपि च अस्मिन्वर्षे (खरसंवत्सरे) शालिवाहनशकवर्षाः = 1933
कामदोग्ध्री व्याख्यानरचनाकाले शालिवाहनशकवर्षाः = 1521
तयोरन्तरम् = 412 वर्षाणि

एवं च 412 वर्षात् प्रागेव कृतमेतत् व्याख्यानं रङ्गनाथकृतगूढार्थप्रकाशिकापेक्षया प्राचीनमिति निश्चयेन वक्तुं शक्यते। आङ्ग्लकालमानानुगुणं क्रिस्तोः अनन्तरं 1599 तमे वर्षे टीकेयं निर्मितेति ज्ञायते। अपि च श्रीवेङ्कटपतिरायपट्टाभिषेकमुहूर्तसमयः अनेन प्रस्तावितः व्याख्याने। तस्य राज्ञः कालविषये अन्तर्जालमध्ये यदुपलब्धं तदधो प्रदर्शितमस्ति —

> Venkata II (A.K.A. Veṅkaṭapati Rāya) (r. CE 1586– 1614) the younger brother of Śrīraṅga I became the ruler of Vijayanagara Empire. His reign of three decades saw a revival of strength and prosperity of the empire. He dealt successfully with the Deccan *sultān*s of Bījāpur and Golkoṇḍā, the internal disorders, promoting economic revival in the country. He brought rebelling Nāyakas of Tamil Nadu and parts of present-day Andhra Pradesh under control.
> — Wikipedia

अत्र वेङ्कटपतिरायस्य कालः क्रि.श. 1586 तः क्रि.श. 1614 पर्यन्तं इति निर्देशितः। ग्रन्थकर्तुः कालः शा.श. 1521+78 = क्रि.श. 1599 इति पूर्वमेव उपस्थापितः। अतः अस्य कालस्तु निर्दुष्टः निर्दिष्टश्च सिद्ध्यति। अनेनायं तम्मयज्वा 16 शताब्दस्योत्तरार्धे 17 शताब्दस्य पूर्वार्धे च देशमिमम् अलञ्चकार इत्यत्र तु न काचित् विप्रतिपत्तिः।

---

[११] कामदोग्ध्रीव्याख्यानम् ।

कामदोग्ध्रीटीकायामपि तम्मयज्वा तत्पूर्ववर्तिनः कतिपयग्रन्थान् कानिचनव्याख्यानानि च समाश्रितानीति अनुसन्धानेन अवगम्यते। कस्मात् कस्मात् ग्रन्थात् कतिवारं तत्रस्थविषयाः उद्धृताः इत्यपि संशोधितमस्ति। यथा — टीकाकृदयं द्विचत्वारिंशत् (42) स्थलेषु ब्रह्मसिद्धान्तस्य, अष्टाविंशति (28) स्थलेषु सिद्धान्तशिरोमणेः, चतुर्विंशति (24) स्थलेषु आर्यभटीयस्य, अष्टादश (18) स्थलेषु दैवज्ञाभरणस्य, चतुर्दश (14) स्थलेषु श्रीपत्याचार्यस्य सिद्धान्तशेखरस्य, मौहूर्तिकमण्डनस्य च एकादश (11) स्थलेषु लल्लाचार्यस्य शिष्यधीमहातन्त्रस्य दश (10) स्थलेषु सिद्धान्तसार्वभौमस्य, नव (9) स्थलेषु सिद्धान्तसारस्य, अष्ट (8) स्थलेषु गर्गाचार्यस्य, षट् (६) स्थलेषु वराहमिहिरस्य, पञ्च (5) स्थलेषु, सिद्धान्ततिलकस्य, चतुर्षु (4) स्थलेषु पितामहस्य, वसिष्टसिद्धान्तस्य, ब्रह्मगुप्तस्य च त्रिषु (3) स्थलेषु मौहूर्तिकालङ्कारस्य, रोमशसिद्धान्तस्य मल्लिकार्जुनस्य विष्णुधर्मोत्तरपुराणस्य च द्वि (2) स्थलेषु विस्तृतगोळस्य विद्यारण्यश्रीचरणानाम्, लीलावत्याः मल्लप्पनाचार्यस्य च एकस्मिन् (1) स्थले मञ्जुलाचार्यस्य सोमनाथपद्धत्याः सिद्धान्तप्रकाशस्य, सूर्याचार्यस्य, उत्तरसौरस्य, मूलपैतामहस्य व्यासस्य, वृद्धवासिष्टस्य, पराशरस्य, बृहस्पतेः, सोमसिद्धान्तस्य, प्राभाकरतन्त्रस्य, मल्ललक्षणाचार्यस्य, श्रीभगवद्गीतायाश्च श्लोकान्वाक्यानि च समुल्लिखति।

कर्तायं तम्मयज्वा न केवलं ज्यौतिषिकः अपि तु शास्त्रान्तरेष्वपि कृतभूरिपरिश्रमः, बहुश्रुतश्च इति स्पष्टमवगम्यते।

**टीकाकृता रचिताः अन्ये ग्रन्थाः**

व्याख्यानमध्ये तत्र तत्र मदुक्त सोमनाथपद्धत्याम्, मदुक्त सिद्धान्तसार्वभौमे, मदुक्त ग्रहगणितभास्करे, मदुक्त मौहूर्तिकमण्डने इत्यादि — उल्लेखनात् सोमनाथपद्धतिः सिद्धान्तसार्वभौमः, ग्रहगणितभास्करः, मौहूर्तिकमण्डनम् इति चत्वारः ग्रन्थाः अपि तम्मयज्वना विरचिताः इत्यनुमीयते।

एवमेव प्रमाणपुरस्सरं व्याख्यानकर्तुः वैदुष्यं, व्याख्यानस्य वैशिष्ट्यञ्च विशेषेण विशदेन च अनुसन्धानं कृतमस्ति। यथा —

उदाहरणपूर्वकं श्लोकानां विवरणं क्रियते चेत् तदा तस्य व्याख्यानस्य प्रस्तुतत्वं सिद्ध्यति। अत्र टीकाकृता तम्मयज्वना महान् परिश्रमः कृतः। एतत् व्याख्यानस्याविर्भावात् पूर्वं सूर्यसिद्धान्तस्य केवलशास्त्रव्याख्यानपरम्परा एव आसीत्। अयं टीकाकारः व्याख्यानकालस्य उदाहरणं दत्वा सूर्यसिद्धान्तश्लोकानां तस्मिन् उदाहरणे अन्वयं प्रतिपादितवान् प्रदर्शितवान् च। अद्य यथा केतकीग्रहगणितं उदाहरणपूर्वकं विद्यते तथा तस्मिन्काले एतत् व्याख्यानं उदाहरणपूर्वकमासीत्। अस्मिन् व्याख्याने दत्तमुदाहरणमाधारीकृत्य अद्यापि सूर्यसिद्धान्तानुसारिपञ्चाङ्गं कर्तुं शक्यते इति तस्मिन्काले एव प्रदर्शितवान्। तादृशः प्रयत्नः आधुनिकज्यौतिषिकैः करणीयः। तदा एव

सूर्यसिद्धान्तः इदानीमपि प्रस्तुतः इति वक्तुं शक्यते। एवं सूर्यसिद्धान्तस्य इदानीमपि प्रस्तुतत्वं साधयितुं एतत् व्याख्यानं प्राधान्यं प्राप्नोति। इदमेवास्य व्याख्यानस्य वैशिष्ट्यम्। व्याख्यानमिमं प्रकाश्यते चेत् जिज्ञासूनां विद्यार्थिनां विदुषां च महदुपकाराय भवति इति विज्ञापयामि।

# 19

## प्राचीनभारतीयानां खगोळपरिशीलनम्

*चि. शिवरामकृष्ण शर्मा*

प्राचीनभारतीयानां खगोळपरिशोधनं प्रशंसनीयं भवति। रविमण्डले तेषां परिशीलनेन एतानि लक्षणानि दृष्टान्यभवन्।

रविर्महान् परिमण्डलः, कुक्षिमान् विपुलः, घृतमण्डनिभः, सुवर्णरजतपद्मप्रभः, विमलः स्निग्धश्च विविधकालेषु वैविध्येन दृष्टो भवति। एतत्पराशरवचनम्।[1]

**वराहसंहितायाम्**

अमलवपुरवक्रमण्डलः स्फटिकविपुलामलदीर्घदीधितिः अविकृततनु वर्णचिह्नभृज्जगति करोति शिवं दिवाकरः। इत्युक्तम्।[2]

श्वेतः शिरीषपुष्पाभः पद्माभो रुक्मसन्निभः।
वैडूर्य घृतमण्डाभः हेमाभश्च दिवाकरः।
वर्णैरेभिः प्रशस्तःस्यात् महास्निग्धः प्रतापवान्।।

इति गर्गपराशरवचने।[3]

"शिशिरे ताम्रः, कपिलो वा वसन्ते, कौंकुमो वा हरितः ग्रीष्मे कपिलवैडूर्यः, प्रावृषि सर्ववर्णः शरदि पद्माभः, हेमन्ते लोहितः, सर्वर्तुश्वेतः पाण्डुवर्णश्च प्रशस्यते" इति पराशरवचनम्। अत्र गर्गसम्मतिरप्यस्ति। सितपीतसमायुक्ते पाण्डुशब्दः प्रयुज्यते।[4]

---

[1] अद्भुतसागरः, श्री वल्लालसेन देवः, 10 तम पत्रम्।

[2] तत्रैव, 10 तम पत्रम्।

[3] तत्रैव, 13 तम पत्रम्।

[4] तत्रैव, 15 तम पत्रम्।

अपि च पराशरः एवमवदत्।

रविर्विवर्णो भूरिवर्णोऽभ्राभावाय। श्यावोजन मरणाय। ताम्रो रुधिराभोवा शस्त्रकोपं करेति। कृष्णवर्णो जगतः क्षयाय। व्यामिश्रवर्णो यावत् दृश्यते परस्परविनाशाय, कृष्णरुधिरवर्णौ जगतः क्षयकरः, वैडूर्य कृष्ण बभ्रुवर्णाः पांसुवर्ण उत्सादकरः। इति फलसूचनपूर्वकं विविध वर्णानि रवौ दृश्यन्त इत्यकथयत्।[5]

एवं वराहसंहितायां वृद्धगर्गवचनेषु पराशरवचनेषु च रविवर्णभेदात् शुभाशुभफलान्युक्तानि।

गार्गीये —

ध्वांक्षो वा कृष्णशंकुर्वा कबन्धोवार्कमण्डले दृश्यते यत्र तत्राशु भूमिपालो विनश्यति।[6] इति रविमण्डले ध्वांक्ष कृष्ण शंकु कबन्धांक दर्शनान्यपि तदा तदा भविष्यन्तीति स्मृतम्। अपि च शकटधनुः क्षेत्र रूपाश्च सूर्यमण्डले दृष्टिमायातीति अनो धनुः क्षेत्ररूपाः नृपवित्त क्षयावहाः। इति वचनेन गार्गीये उक्तम्।[7]

रविबिम्बे दण्डदर्शनमप्यस्ति।
दण्डे नरेन्द्रमृत्युर्व्याधिभयं कबन्धसंस्थाने।
ध्वाङ्क्षे च तस्करभयं दुर्भिक्षं कीलकेऽर्कस्थे।।

इति वराहसंहितावचनादवगम्यते।[8]

गार्ग्यस्तु श्वशृगालादि रूपाण्यपि अर्कमण्डले तदा तदा दृश्यन्ते इत्यब्रवीत्।

श्वशृगालाश्व कीलानां तथा धूम कबन्धयोः।
दर्शनं सूर्यबिम्बे चेद्विनाशो भूपतेस्तदा।।[9]

वृद्धगार्ग्योऽपि

शृगालान् गर्दभानश्वान् तथान्यान्मृगपक्षिणः।
आदित्यमण्डले दृष्ट्वा देशभङ्गं विनिर्दिशेत्।।[10]

इति मृगपक्षिणोऽपि आदित्यमण्डले दृश्यन्त इत्यब्रवीत्।

---

5 तत्रैव, 16 तम पत्रम्।

6 तत्रैव, 19 तम पत्रम्।

7 तत्रैव, 20 तम पत्रम्।

8 तत्रैव, 20 तम पत्रम्।

9 तत्रैव, 20 तम पत्रम्।

10 तत्रैव, 20 तम पत्रम्।

गर्गस्तु पताका प्रासाद तोरणाकारा अपि रविमण्डले दृष्टा भवन्तीति।

अहस्करे पताकादीन् प्रासादांस्तोरणानि च।
सन्ध्ययोरुभयोः पश्येन्महदुत्पद्यते भयम्।। इत्युक्तवान्[11]

वराहसंहितायान्तु

राजोपकरणवर्णच्छत्रध्वजचामरादिभिर्विद्धः।
राजान्यत्वकृदर्कः स्फुलिङ्गधूमादिभिर्जनहा।।[12]

इति छत्र ध्वज चामरादीनि धूमादयोऽपि रविमण्डले वर्तन्त इत्यवोचत्। वटकणिकायां "ज्वाला स्फुलिङ्ग धूमाः अर्कमण्डले दृश्यन्त इति ज्वाला स्फुलिङ्ग धूमैर्जनक्षयः" इति वचनेनाप्रकटयत्।[13]

मुण्डाकृतिःखण्डत्वं रवौ दृश्यत इति।
खण्डो वा कृष्णरेखा वा मुण्डः पिङ्गलकोऽपि वा।
देशविभ्रममादित्यो राजमृत्युञ्च सूचयेत्।।[14]
— इति वचनात् विज्ञायते

उलूकसंस्थानो रवौ दृश्यत इति।
मुण्डाकार उलूकसंस्थान उन्मादापस्मारकृत्
— इति पराशरवचनं वर्तते[15]

स्थाली पिठराकृतिः, अञ्जनवर्णम्,
ह्रस्वमण्डलत्वं तदा तदा दृष्टा भवन्तीति।
विरूक्षेण भवेत् क्षेमः स्थाली पिठर सन्निभे।
अनावृष्टिश्च वैरञ्च संक्षिप्तेसूर्यमण्डले।।

रुक्षोऽरुणोञ्जनश्यामः सूर्यो वा ह्रस्वमण्डलः।
— इति वृद्धगर्गवचनात् ज्ञातं भवति

(अत्र पिठरशब्दः घटापरपर्यायः रूक्षशब्देन चिक्कणमुच्यते)

भास्करे निष्प्रभत्वं, धूम्रवर्णञ्च दृश्येते इति स एवाह।

---

[11] तत्रैव, 20 तम पत्रम्।

[12] तत्रैव, 20 तम पत्रम्।

[13] तत्रैव, 20 तम पत्रम्।

[14] तत्रैव, 21 तम पत्रम्।

[15] तत्रैव, 21 तम पत्रम्।

निष्प्रभे धूम्रवर्णेऽर्के सर्वतो जायते भयम्
— इति रविर्वज्रसन्निभो दृश्यत इति[16]

अतिरूक्षे भयं ब्रूयात् स्थाली पिठरसन्निभे।
संक्षोभात् क्षीयते लोको दुर्भिक्षं वज्रसन्निभे।।[17]
— इति गर्गवचनात् गम्यते

महाभारते कदापि सूर्यः द्विधाभूतो दृश्यत इति।

द्विधाभूत इवादित्य उदये प्रत्यदृश्यत इति उक्तम्।[18]

त्रिधा भिन्नो दृश्यत इति वृद्धगर्गवचनम्।

आदित्यमण्डलं छिन्नं द्विधा वा यदि वा त्रिधा।
तद्राजमरणं ब्रूयात् दण्डो वा यदि दृश्यते।।[19] — भारते भीष्मपर्वणि

ज्वलन्त्या शिखया भूयो भानुमानुदितो रविः।
इति ज्वलच्छिखया उदयरविः दृष्टो भवदिति वर्तते।।[20]
— मयूरचित्रे आदित्ये विषाणानि दृश्यन्त इति

विषाणैरिव चादित्यस्त्रिकूट इव लक्ष्यते।
जनमाराग्नि शस्त्राद्यं घोरमुत्पद्यते भयं इति स्थितम्।।[21]

गगने द्विसूर्यदर्शनमपि सम्पद्यत इति विष्णुधर्मोत्तरमकथयत्।
द्विसूर्ये गगने युद्धं क्षित्रियाणां विनिर्दिशेत् ।।[22]
— इति वराहसंहितायां त्रिचतुष्प्रभृतिसूर्याणां दर्शनं द्वि चन्द्रदर्शनं तदा तदा भवतीति वर्तते। यथा

दिविभाति यदा तुहिनांशुयुगं द्विजवृद्धिरतीव तदाशु शुभम्।

---

16 तत्रैव, 22 तम पत्रम्।

17 तत्रैव, 22 तम पत्रम्।

18 तत्रैव, 22 तम पत्रम्।

19 तत्रैव, 22 तम पत्रम्।

20 तत्रैव, 22 तम पत्रम्।

21 तत्रैव, 23 तम पत्रम्।

22 तत्रैव, 23 तम पत्रम्।

तदनन्तरवर्णरणोऽर्कयुगे जगतः प्रळयस्त्रिचतुष्प्रभृति।।[23]

आग्नेयपुराणे सप्तसूर्यदर्शनमपि तदा तदा भविष्यतीति वर्तते।

सप्तधूमनिभा घोरा सूर्या दिवि समुत्थिताः इति।[24]
तैत्तिरीयारण्यकेऽपि "सप्तसूर्या दिवमनुप्रविष्टाः"।।
— इति सप्तसूर्यप्रसक्तिर्वर्तते (1.7.3)

आदित्ये रथदर्शनं भवतीति भार्गवीये स्थितम्। यथा —

आदित्यस्य रथः श्वेतः सन्ध्यायां यदि दृश्यते।
प्रत्यासन्नं भयं विद्यात्तस्मिन्नुत्पातदर्शने।।[25]

सूर्यमण्डले सेनादृष्टा भवतीति गर्गवचनम्। यथा —

आदित्ये स रथा सेना सन्ध्याकाले यदा भवेत्।
प्रत्यासन्नं विजानीयात् भूमिपस्य पराजयम्।।[26]

रविः कांस्यपात्रनिभः, शशांक इव रश्मिरहितश्च तदा तदा भवतीति वृद्धगर्ग उवाच।

कांस्यपात्रनिभस्सूर्यश्शशांक इव लक्ष्यते।
विरश्मिर्नभसोमध्ये महद्भयकरः स्मृतः।।[27]

मयूरचित्रे आदर्श इव रविर्भवतीति आदर्श इव सूर्ये च जनदेश — भयं भवेत् इति वचनात् विज्ञायते।[28]

रवौ छिद्रदर्शनं भवतीति स्थितम्। यथा —

युवराजवधश्छिद्रे वधो माण्डलिकस्य च
रविबिम्बस्थछिद्रं बुधाच्छादनकृतमिति व्याख्यातृवचनाद्विज्ञायते।
"रवौ अधः भार्गवकृतछिद्रमपि भवतीति तद्वचनाद्ज्ञातव्यम्"।।[29]

---

[23] तत्रैव, 23 तम पत्रम्।

[24] तत्रैव, 23 तम पत्रम्।

[25] तत्रैव, 24 तम पत्रम्।

[26] तत्रैव, 24 तम पत्रम्।

[27] तत्रैव, 25 तम पत्रम्।

[28] तत्रैव, 25 तम पत्रम्।

[29] तत्रैव, 26 तम पत्रम्।

पराशरस्तु सर्वतश्छिद्रवन्तं सूर्यमप्यवोचत्।

"सर्वतश्छिद्रो द्विधा वा दृश्यमानो राज्ञः मृत्युं देशविनाशं व्याचष्टे" इति[30]

भास्करार्धदर्शनं, कम्पनं, भ्रमणं तदा तदा भवन्तीति मयूरचित्रवचनमस्ति।

दृश्यते भास्करस्यार्धं गृहीतमिवचापरम्।
कम्पते यदि वाप्येव तदा विद्याज्जनक्षयम्।।

उदयास्तमये भानौ चक्रवद्भ्रमणे सति।
परचक्रागमो व्याधिर्देशस्य च परिक्षयः।।[31]

एवं रविबिम्बे विविधान्यद्भुतानि प्राचीनभारतीयैर्दृष्टानि वर्तन्ते।

अगस्त्यः शातकुम्भनिभः, स्फटिकसदृशश्च दृश्यते।

यथा वराहसंहितायाम्

शातकुम्भनिभं स्फटिकाभम्। तर्पयन्निव महीं किरणाद्यैः।।
दृश्यते यदि मही प्रचुरान्ना। भूर्भवत्यभयरोगजनाढ्या।।[32]
कदाचनागस्त्यः स्वल्परूपेणापि दृश्यते। स्पन्दनस्सन् वर्तते।

यदाह पराशरः

संवृतः पुररोधाय स्पन्दनो भयाय।
कपिलधूम्रमाञ्जिष्ठवर्णैरपि तदा तदा वर्तते।

यथा वराहसंहितायामेव

रोगान् करोति कपिलः परुषस्त्ववृष्टिम्।
धूम्रो गवामशुभकृत् स्फुरणो भयाय।।

माञ्जिष्ठरागसदृशः क्षुधमाहवञ्च।
कुर्यादणुश्च पुररोधमगस्त्यनामा।।

नीलः अग्नि परुषश्च कदापि दृश्यते।[33]

यथा पराशरः

---

[30] तत्रैव, 27 तम पत्रम्।

[31] तत्रैव, 28 तम पत्रम्।

[32] तत्रैव, 202 तम पत्रम्।

[33] तत्रैव, 202 तम पत्रम्।

नीलोतिवर्षाय अग्निपरुषरुक्षाभो रोगाय इति।

सप्तर्षयः कदापि कान्तिहीना भवन्ति

यथा भीष्म पर्वणि

सप्तर्षीणामुदाराणां समवच्छाद्यते प्रभा।[34]

गर्गस्तु

हता विवर्णास्स्वल्पा वा किरणैः परिवर्जिताः।

इति सप्तर्षीणां स्वल्परूपदर्शनमपि भवतीत्याह।[35]

विष्णुधर्मोत्तरे सप्तर्षीणां वर्णवैविध्यं वर्तत इत्युक्तम्।[36]

अगस्त्योऽरुणो रुक्षः श्यावो रेणूल्कयोपहतः शिखि शिखाध्वस्तो भयाय

एवंविधाः सप्तर्षयश्च पीडाकराः एवं विधे धृवे त्रैलोक्यमपि पीड्यते।[37]

भीष्मपर्वण्यपि

धृवः प्रज्वलितो घोरमपसव्यं प्रवर्तते इति।[38]

यद्यप्येते मुनयः सूर्यादीनां वर्णविपरिणामात् जनानां शुभाशुभसूचनं वदन्ति। तत्काले तेषां परिशीलनेन दृष्टानि तैर्लिखितानि। अद्य तद्विषयपरिशोधनेन निर्धारयितव्यानि सन्ति। एतानि तत्र भवता राजाधिराज वल्लालसेनेन अद्भुतसागरनामकसंकलनग्रन्थे विविधसंहिताग्रन्थेभ्य उद्धृतानीति तस्मै धन्यवादान् समर्पयामि।

नक्षत्राणां चलनं नास्तीति केषाञ्चित् ज्यौतिषिकानां अभिप्रायोऽस्ति।[39] किन्तु वेदे नक्षत्राणां चलनमस्तीति वर्तते। "कृत्तिकाः प्रथमम्, विशाखे उत्तमम्, तानि देवनक्षत्राणि, अनूराधाः प्रथमम्, अपभरणीरुत्तमम्, तानि यमनक्षत्राणि, यानि देवनक्षत्राणि, तानि दक्षिणेन परियन्ति, यानि यमनक्षत्राणि तान्युत्तरेण"[40] इति नक्षत्राणां सञ्चारः तत्रवर्णितः। मैत्रेयोपनिषदि

---

[34] तत्रैव, 204 तम पत्रम्।

[35] तत्रैव, 204 तम पत्रम्।

[36] तत्रैव, 204 तम पत्रम्।

[37] तत्रैव, 205 तम पत्रम्।

[38] तत्रैव, 206 तम पत्रम्।

[39] सूर्यसिद्धान्तः, सुधाकर द्विवेदी ग्रन्थमाला, संपूर्णानन्द संस्कृत-यूनिवर्शिटी, वाराणसि, 1987, 12 पत्रम्।

[40] तैत्तिरीयब्राह्मणम् 1.5.2.7।

ध्रुवचलनमपि श्रुतमभवत्।[41]

यूरप् स्पेस् ऐजन्सीस् संस्था उपग्रहात् प्लांक् टेलिस्कोप् द्वारा एकसंवत्सरकाले सकलस्यास्य विश्वस्य छायाचित्रनिर्माणमकरोत्। जूलै पञ्चमतारीकायां दशोत्तर द्विसहस्रतमाब्दे तच्चित्राविष्करणमकुर्वन्।[42]

तस्मिन् वेदोक्त शिशुमारः, प्रणवश्च स्थितौ। तैत्तिरीयारण्यके शिशुमारवर्णनमेवमस्ति "यस्मै नमस्तच्छिरो धर्मो मूर्धानं ब्रह्मोत्तरा हनुर्यज्ञोऽधरा विष्णुर्हृदयं संवत्सरः प्रजननमश्विनौ पूर्वपादावत्रिर्मध्यं मित्रावरुणावपरपादावग्निः पुच्छस्य प्रथमं काण्डं तत इन्द्रस्ततः प्रजापतिरभयं चतुर्थं सवा ऐष दिव्यश्शाक्वरश्शिशुमारः"।[43]

अत्र वर्णिताः मूर्धा, हनु, हृदय, प्रजनन मध्य, पुच्छ काण्डाः विश्व चित्रे दृश्यन्ते। अपि च चित्रेऽस्मिन् प्रणवलिपिः वर्तते। प्रणवस्य प्रशंसा उपनिषत्सु अस्ति। माण्डूक्योपनिषदि प्रणवोपासनमस्ति। या प्रणवलिपिः विश्वचित्रे अस्ति सैव हरप्पासंस्कृत्यवयवेषु पशुपतिमुद्रिकायां दक्षिणभागे वर्तते। तस्य वाचकः प्रणवः इति पतंजलिमुनेः योगसूत्रेषु ईश्वरस्य प्रणवस्य च वाच्य वाचक भावोऽस्ति। सैव प्रणवलिपिरद्यापि व्यवहारे वर्तत एव।[44]

वेधशाला टेलिस्कोप् इत्याद्याधुनिकोपकरणरहिते काले प्राचीनभारतीयाः एतादृश खगोळपरिशीलनमकुर्वन्निति एते विषया निरूपयन्ति।

---

41 मैत्रेयोपनिषत् प्रथमोऽध्यायः, 2 अष्टोत्तर शतोपनिषदः, वाविळ्ळ प्रेस, मद्रासु, चेन्नपुरि, 1954, 451 पत्रम्।

42 http://www.esa.intCP/SEMF2FRZ5BG_index_0.html।

43 तैत्तिरीयारण्यकम् 2 प्र. 19 अनु.।

44 योगसूत्रवृत्तिः, श्री सदाशिवेन्द्रसरस्वति, वाणीविलासमुद्रणालयम्, 1927, 15 पत्रम्।

# 20

## सूर्यसिद्धान्ते अन्तरीक्षशास्त्रम्

*ई.एन्. ईश्वरन्*

अत्र अन्तरीक्षं नाम "द्यावापृथिव्याः अन्तर् ईक्ष्यते"[1] इति व्युत्पत्त्या प्रदीयमानोऽर्थो वा "नभोऽन्तरीक्षं गगनम्....।"[2] इत्यादि कोशगतार्थे वा गृह्यते। अन्तर् ऋक्षाण्यस्य इत्यर्थे "पृषोदरादित्वात्"[3] इत्वम् कल्पयित्वा अन्तरिक्षम् इत्यपि प्रयुज्यते। अन्तरीक्षसम्बन्धि शास्त्रम् अन्तरीक्षशास्त्रम् *Atmospheric Science* इति विशालार्थे। Meteorology इत्यर्थे अन्तरीक्षशास्त्रमिति प्रयोगः एकदेशार्थे।

सूर्यसिद्धान्तः त्रिविधः इति पण्डितमतम्। तत्रैकः आर्षः द्वितीयः वराहमिहिरप्रतिपादितः तृतीयः अधुना उपलभ्यमानश्चेति। अर्वाचीनसूर्यसिद्धान्तस्य आर्यभटमतस्य बहुसाम्यता दृश्यते। अर्वाचीनमिति कथनमस्ति चेदपि अस्य रचनाकालः "शकेन्द्रपञ्चमशतकादर्वाचीनम् कदापि न सम्भवति"[4] इति आचार्यलोहमणिदहालः भारतीयज्योतिषशास्त्रस्येतिहासे स्फुटं वदति। कालः कदापि भवतु अयं सिद्धान्तग्रन्थः सर्वादृतः आसीदिति अनन्तरकालिकानामुद्धरणेभ्यः ज्ञायते।

सम्प्रति उपलभ्यमाने सूर्यसिद्धान्ते चतुर्दशाधिकाराः दृश्यन्ते। ते च मध्यम-स्पष्ट-त्रिप्रश्न-छेद्यक-चन्द्रग्रहण-सूर्यग्रहण-ग्रहयुति-भग्रहयुति-उदयास्त-चन्द्रश्रृङ्गोन्नति-पात-भूगोल-ज्योतिषोपनिषद्-मानादयः भवन्ति।

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः।।[5]

---

1 अ.को.रा.व्या.पु. 36।

2 अ.को. 1.2.1.

3 पा.सू. 6.3.109.

4 भा.ज्यो.इ.पु. 74.

5 सू.सि. 1.1.

इति मङ्गलश्लोकेन जगदाधारस्वरुपं परब्रह्मं नमस्कृत्य सूर्यसिद्धान्तस्यास्योत्पत्तिं प्रतिपादयति। यथा —

अल्पावशिष्टे तु कृते मयो नाम महासुरः।
रहस्यं परमं पुण्यम् जिज्ञासुर्ज्ञानमुत्तमम् ।।

वेदाङ्गमग्र्यमखिलं ज्योतिषां गतिकारणम् ।
आराधयन् विवस्वन्तं तपस्तेपे सुदुश्चरम्।।[6] इति ।

ज्योतिर्गोलानां गतिकारणः सविता तपसा तुष्टः मयासुराय ज्ञानोपदेशं कृतवान् इत्यतः अस्य सूर्यसिद्धान्तः इति नाम।

तोषितस्तपसा तेन प्रीतस्तस्मै वरार्थिने।
ग्रहाणां चरितं प्रादान्मयाय सविता स्वयम्।।[7]

एवं मयासुरकृतेऽस्मिन्ग्रन्थे भूगोलाधिकारे बहुविधान् अन्तरीक्षशास्त्रविषयान् द्रष्टुं शक्नुमः।

भूमेरुपर्युपर्यूर्ध्वाः किमुत्सेधाः किमन्तराः।
ग्रहर्क्षकक्षाः किं मात्राः स्थिताः केन क्रमेण ताः ।।[8]

इत्यादिभूमेः अन्तरीक्षविषयकः मयासुरप्रश्नः। तत्र सूर्यसमाधानमिति दृष्ट्या अनेके विषया प्रतिपादिताः। सूर्य एव कालस्य कारणम् कालनियन्त्रकः इत्यादि विचारः दृश्यते। यथा —

अहोरात्रव्यवस्थां च विदधाति कथं रविः।

कथं पर्येति वसुधां भुवनानि विभावयन्।।[9] इति मयासुरप्रश्नः। ततश्च देवासुरादिकालभेदः दिवसादीनामधिपाः ग्रहकक्षाक्रमः नक्षत्रस्थितिः इत्यादिभिस्सह धनसञ्चारमार्गः कः इत्यपि सूर्यः स्पष्टयति ।

ब्रह्माण्डमेतत् सुषिरं तत्रेदं भूर्भुवादिकम् ।
कराहद्वितयस्येव सम्पुटं गोलकाकृति ।।

ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाभिधीयते ।
तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा ।।

---

[6] तत्रैव 1.2-4.

[7] तत्रैव 1.4.

[8] तत्रैव 12.7.

[9] तत्रैव 12.3.

मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः।
परिभ्रमन्त्यधोऽधस्था सिद्धाः विद्याधराः घनाः।।[10] इति।

ब्रह्माण्डपरिधिः व्योमकक्षा इति विचारः। चन्द्रादधः एव मेघानां सञ्चारमार्गः इत्यादि विषयाः स्फुटाः।

प्राचीनम् सौरयूथम्




[10] तत्रैव 12.29-31.

आधुनिकम् सौरयूथम्




केचन वदन्ति यत् प्राचीनं सौरयूथं न भौमयूथं एवेति। तत्तु सर्वधा असमञ्जसमिति अनेनैव ज्ञायते। अत्र शुक्रेन्दुजोः परिवर्तनं विचिन्त्यम्।

"ज्योतिषां गतिकारणम्" इत्यतः ज्योतिर्गोलानां गतिकारणः सविता एवेति भावः। "कथं पर्येति वसुधां भुवनानि विभावयन्" इत्यतः वसुधां भुवनानि च विभावयन् गृह्णन् रविः कथं पर्येति इति व्याख्येयोऽयम् ग्रन्थः।

ऋतोः अनुसारेण सूर्यरश्मिभेदाः कीदृशाः इति यथा —

ग्रीष्मे तीव्रकरो भानुर्न हेमन्ते तथाविधः ।[११]

अत्यासन्नतया तेन ग्रीष्मे तीव्रकराः रवेः।[१२] इत्यादि च ।

एवं बहुविधा अन्तरीक्षशास्त्रविषया अत्र सूर्यसिद्धान्ते प्रतिपाद्यन्ते ।

[11] तत्रैव 12.8.

[12] तत्रैव 12.46.

# 21

## सिद्धान्तशेखरः

*ए. श्रीपाद भट्टः*

यत्तेजः पितृधाम्नि शीतमहसः पाथोमये मण्डले
संक्रान्तं कुमुदाकरस्य कुरुते काञ्चिद्विकासश्रियम् ।
चञ्चच्चञ्चुपुटेश्चकोरनिकरैश्चापीयतेऽसौ चिरं
त्रैलोक्यालयदीपको विजयते देवो निधिस्तेजसाम् ।।

सिद्धान्तशेखरः प्राचीनभारतीयप्रसिद्धज्योतिषग्रन्थेषु अन्यतमः। 1039 क्रिस्ताब्दे श्रीपतिर्नामा ज्योतिर्विद् ग्रन्थमिमं व्यरचयत्। काश्यपगोत्रोद्भवस्य श्रीपतेः पितुर्नाम नागदेव इति। उज्जैनीतः 150 क्रोशस्थिते रोहिणीखण्डे अयं न्यवसदिति ज्ञायते। अयमेव श्रीपतिः जातकपद्धतिं तथा च रत्नमालाख्यं मुहूर्तग्रन्थमपि ग्रथितवानिति तर्क्यते। श्रीपतेर्विषये इतोऽप्यधिकं नोपलभ्यते ।

त्रयोदशशताब्दे स्थितेन मक्किभट्टेन गणितभूषणाख्येन स्वीयव्याख्यानेन सिद्धान्तशेखरः समलंकृतः। किन्तु व्याख्यानमिदं त्रिप्रश्नाधिकारस्य 75 श्लोकपर्यन्तमेव समुपलभ्यते। सिद्धान्तशेखरोऽयं 1932 तमे क्रिस्ताब्दे कलकत्ताविश्वविद्यालयेन प्रकाशितः यश्च श्रीमद्भिः भावूजीमिश्रामहोदयैः सम्पादितः। मुद्रितग्रन्थस्यावशिष्टभागः सम्पादकमहोदयैः स्वीयविवरणाख्येन व्याख्यानेन संयोजितः। ग्रन्थोऽयं सम्प्रति कुत्रापि नोपलभ्यते। भाग्यवशात् राजमहेन्द्रीपुरनिवासिभिः स्वनामधन्यैः श्रीमधुरकृष्णमूर्तिशास्त्रिपादैः मह्यं मुद्रितपुस्तकस्य प्रतिलिपिः सम्प्रेषिता येनाहं ग्रन्थममुं पठितुं पारितवान्।

ग्रन्थेऽस्मिन् 20 अध्यायाः सन्ति। ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तमाधारीकृत्य श्रीपतिना सिद्धान्तशेखरः रचितः इति प्रतिभाति। परन्तु विषयनिरूपणावसरे आकर्षकछन्दांसि प्रयुज्य लल्लस्य शैलीमनुकरोति श्रीपतिः। ब्रह्मगुप्तविरचितं ब्रह्मस्फुटसिद्धान्तं, लल्लविरचितं शिष्यधीवृद्धिदं सम्यक् परिशील्य श्रीपतिना सिद्धान्तशेखरः विरचितः। न केवलमयं त्रिस्कन्धज्योतिषे एव निपुणः अपि तु व्याकरणे छन्दश्शास्त्रे च परिणतः आसीदिति तत्कृतग्रन्थावलोकनेन स्पष्टं

प्रतिभाति। अनन्तरकालिकः प्रसिद्धः भास्करः स्वसिद्धान्तशिरोमणिग्रन्थं श्रीपतेः सिद्धान्तशेखरं बहुधा अवलम्ब्यैव रचितवानिति उच्यते चेत् नातिशयोक्तिः। भास्कराचार्यस्य सिद्धान्तशिरोमणेः मध्यमाधिकारः श्रीपतेः सिद्धान्तशेखरस्य साधनाध्यायेन बहुसाम्यमावहति। प्रायः साधनाध्यायोक्ताः एव विषयाः भास्करेण पदानि छन्दांसि च परिवर्त्य निरूपिताः इति ग्रन्थपर्यालोचनेन स्पष्टं भवति।

सिद्धान्तशेखरस्य मध्यमाधिकारे अहर्गणानयने, ग्रहाणामध्यमानयने च बहवः प्रकाराः निरूपिताः। मक्किभट्टस्य व्याख्यानमपि चमत्कारपूर्णं विद्यते। व्याख्यानस्य वैशिष्ट्यद्योतनार्थमिदमेकमुदाहरणं प्रस्तूयते। साधनाध्याये कुदिनस्य परिभाषामित्थं निरूपयति मक्किभट्टः —

> भूमेः सम्बन्धिनो दिवसा इत्यर्थः। भूमिः प्राङ्मुखी भ्रमति। सा च यावत्तावतो वारान् क्षितिजे रविणा सह सम्बन्ध्यते तावन्ति सावनदिनानि भूदिनानीत्युच्यन्ते। इति

भूमेः दैनन्दिनमक्षभ्रमणं निरूपयति। एतेनेदं स्पष्टं जायते यत् बहवः प्राचीनाः भारतीयज्योतिर्विदः भुवः भ्रमणं जानन्त एव आसन्। किन्तु साम्प्रदायिकानां विशोधभयात् भचक्रभ्रमणमेवाङ्गीचक्रुरिति। कृतयुगादीनां सौरवर्षसङ्ख्यानिरूपणावसरे "कटपयादि"अक्षरसङ्ख्याविधानेन "ज्ञान" पदं प्रयुज्य स्वीयं नैपुण्यं प्रदर्शयति मक्किभट्टः —

| | | |
|---|---|---|
| ज्ञानो निर्जरैः सेव्यः | — | 1,728,000 |
| ज्ञानी नीतिधारकः | — | 1,296,000 |
| ज्ञानिनो वित्तदाः | — | 8,64,000 |
| ज्ञानेन श्रीलाभः | — | 4,32,000 |

अहर्गणानयनावसरे केवलं कटपयादि अक्षरसङ्ख्याविधिनेनैव स्वकालिकाहर्गणमेकं सोदाहरणं निरूपयति। वारप्रवृत्तिप्रसङ्गे मध्यमाध्याये बहूनां मतान्तराणि प्रदर्शयति —

केचिद्वारं सवितुरुदयादाहुरन्ये दिनार्धात्
भानोरर्धास्तमयसमयादूचिरे केचिदेवम् ।
वारस्यादिं यवननृपतिर्दिङ्मुहूर्ते निशायां
लाटाचार्यः कथयति पुनश्चार्धरात्रे स्वतन्त्रे ।। 10 ।।

स्वीयं मतमधोनिर्धिष्टरीत्या निरूपयति —

सृष्टेर्मुखे ध्वान्तमये हि विश्वे ग्रहेषु सृष्टेष्विनपूर्वकेषु ।
दिनप्रवृत्तिस्तदधीश्वरस्य वारस्य तस्मादुदयात् प्रवृत्तिः ।। 11 ।।

श्रीपतिना अपवर्तनस्य सौकर्यार्थं त्रिज्या 3415 मिता स्वीकृता। चतुर्विंशतिर्ज्याः अपि

ब्रह्मगुप्तादीनामपेक्षया किञ्चित् भिन्नाः स्वीकृताः। पाठपठितज्याभिर्विनैव दोःकोटिजीवे सम्पादयितुं श्रीपतिः नूतनमुपायमाह यच्च इतरसिद्धान्तग्रन्थेषु नोपलभ्यते।

यथा स्पष्टाधिकारे —

दोःकोटिभागरहिताभिहताः स्वनाग चन्द्रास्तदीयचरणोनशरार्कदिग्भिः।
ते व्यासखण्डगुणिता विहताः फले तु ज्याभिर्विनैव भवतो भुजकोटिजीवे ।। 17 ।।

अस्य सूत्रं एवं निरूप्यते —

(180° - इष्टभुजांशाः) = क

क X (180 - क ) = ग

10,125 - (ग/4) = द

(ग X त्रिज्या)/ द = इष्टज्या

अस्यैकमुदाहरणं मया निरूप्यते —

इष्टभुजांशाः = 50°

180 - 50 = 130

130 X 50 = 6,500

6,500/4 = 1,625, त्रिज्या = 3,415

10,125 - 1,625 = 8,500

(6,500 X 3,415)/ 8,500 = स्वल्पान्तरेण ज्या 2,611

एवमेव इष्टज्यायां ज्ञातायां चापसाधनक्रमोऽपि पठितज्याभिर्विनैव निरूपितः श्रीपतिना, यच्च विश्तारभयात् न प्रदर्श्यते। प्रायः अमुमेवप्रकारमवलम्ब्य ग्रहलाघवकारः गणेशः पठितज्याभिर्विनैव कर्मसम्पादयतीति विश्वस्यते।

त्रिप्रश्नाध्यायः अत्यन्तं विस्तरेण श्रीपतिना निरुपितः। दिग्ज्ञानोपायसन्दर्भे क्रान्त्यक्षांशान् विहायापि दिक्साधनक्रमः निरूपितः। पलभामानेतुं विशिष्टप्रकारः तेनोक्तः यः श्रीपतेः कुशाग्रमतित्वं द्योतयति —

अजतुलादिगतस्य विवस्वतो दिनदलप्रभयोर्युतिरर्धिता ।
भवति वैषुवती निजदेशजा तदिनवर्गयुतेश्च पदं श्रुतिः ।।

मेषादिगतस्य तुलादिगतस्य च भानोर्ये मध्याह्नच्छाये तयोर्युतिरर्धिता निजदेशजा पलभा भवतीति

श्रीपतिः निरूपयति। अत्र सूक्ष्मातिसूक्ष्मफलसाधनमेव श्रीपतेर्लक्ष्यमिति स्फुटं जायते। यदा छायातः रवेर्भुजांशाः आनीयन्ते तदा पदज्ञानपुरस्सरं राश्यादिकस्य रवेज्ञानार्थं विनूतनोपायः कमलाकरेण गर्वेण प्रतिपादितः सः उपायः वस्तुतस्तु श्रीपत्याविष्कृत एव। यथा त्रिप्रश्नाधिकारे —

आद्ये पदेऽपचयनी पलभाल्पिका स्यात्
छायाल्पिका भवति वृद्धिमती द्वितीये ।
अक्षद्युतेः समधिकोपचिता तृतीये
तुर्ये पुनः क्षयवती तदनल्पिका च ।। 70 ।।

एवं पलभा-दिनार्धच्छाये आश्रित्य सुलभप्रकारेण पदज्ञानपुरस्सरं राश्यादिकस्य रवेः ज्ञानोपादः श्रीपतिना प्रतिपादितः। त्रिप्रश्नाधिकारे यथासम्प्रदायं प्रश्नान् आशंक्य समाधानानि च प्रदर्शयति।

व्यासपरिधिसम्बन्धविषयेऽपि व्यासवर्गाद्दशगुणात् मूलं परिधिरिति स्थूलमपि प्राचीनानां मतमेव स्वीकृतम्। ग्रहयुद्धाध्यायस्य प्रथमश्लोके —

अन्त्यभ्रमेण गुणिता रविबाहुजीवा-भीष्टभ्रमेण विहृता फलकार्मुकेण।
बाहोः कलासु रहितास्ववशेषकं ते यातासवो युगयुजोः पदयोर्धनर्णम् ।।

इति उदयान्तरकर्मणः सूचनां दत्वा अग्रिमश्लोके अन्यं विषयं निरूपयति। सिद्धान्तशिरोमणौ यावत् अस्य उदयान्तकर्मणः वैशद्यं प्रस्तुतं तावदत्र नोपलभ्यते। केचित् विद्वांसः भास्कराचार्यैः श्रीपतेरमुमाशय- मवलम्ब्यैव उदयान्तरं कर्मप्रतिपादितमिति प्रतिपादयन्ति। अस्यैव अध्यायस्य 2-4 श्लोकेषु चन्द्रस्य दृग्गणितसिद्ध्यर्थं संस्कारविशेषं श्रीपतिः प्रतिपादयति यश्चायं संस्कारः आधुनिकानां "ईक्वेशन् वेरियेशन्" (equation variation) इति संस्काराभ्यां स्वल्पान्तरेण साम्यं वहतीति विद्वांस आमनन्ति। श्रीपतिना सिद्धान्तशेखरे व्यक्ताव्यक्तगणिताध्यायौ संयोजितौ विद्येते। भूसंस्थानविषये श्रीपतिना स्वसिद्धान्ते प्रतिपादिता विषयाः सर्वेऽपि भास्कराचार्यैः तेनैव क्रमेण सिद्धान्तशिरोमणौ पदान्तरैः प्रस्तुता इति तु विस्मयं जनयति। भास्कराचार्यैः यश्चापूर्वः भुवः आकर्षणशक्तिसिद्धान्तः समुपस्थापितः स सिद्धान्तः प्रायः सिद्धान्तशेखरस्य प्रेरणया तन्मनसि समुत्पन्न इति प्रतिभाति। यथा गोलाध्याये —

नभस्ययस्कान्तमहामणीनां मध्ये स्थितो लोहगुडो यथास्ते ।
आधारशून्योऽपि तथैव सर्वाधारो धरित्र्या ध्रुवमेव गोलः।। 22 ।।

रविचन्द्रयोरुपरागकारणं राहुरिति पुराणमतं निराकर्तुं राहुनिराकरणाध्यायः इति पृथगध्याय एव श्रीपतिना सिद्धान्तशेखरे संयोजितः इत्यनेन तस्य वास्तवस्थितिनिरूपणविषये महान् आग्रहः

आसीदिति ज्ञातुं शक्यते। यथासम्प्रदायं अस्मिन्नपि ग्रन्थे अन्ते प्रश्नाध्यायमपि संयोज्य जिज्ञासूनां ज्ञानपिपासां संवर्धयति श्रीपतिः।

यद्यपि निजपूर्ववर्तिभ्यः ज्योतिषग्रन्थकर्तृभ्यः विशिष्य लल्लब्रह्मगुप्ताभ्यां च बहून् विषयान् समादाय श्रीपतिना सिद्धान्तशेखरः विरचितस्तथापि बहुत्र स्वबुद्धिबलात् अपूर्वानपि कांचन शास्त्रविषयान् विदुषां छात्राणां च विनोदाय आविष्कृतवानित्यत्र नास्ति संशयलेशोऽपि। भास्कराचार्यैः सिद्धान्तशिरोमणौ बहवः श्रीपतिप्रतिपादिताः विषयाः पदान्तरैः भिन्नच्छन्दोभिः निरूपिताः इति श्रीपतेः सिद्धान्तशेखरस्याध्ययनेन स्पष्टं प्रतिभाति। केवलं स्थालीपुलाकन्यायेन सिद्धान्तशेखरस्य परिचयः दिङ्मात्रेण प्रबन्धेऽस्मिन् प्रस्तुतः।

# 22

## अहर्गणानयनम्

*केशव मिश्रः*

अह्नां दिनानां गणः समूहोऽहर्गणः इति। वस्तुतस्तु त्रिस्कन्धात्मके ज्योतिषशास्त्रे सिद्धान्तज्योतिषशास्त्रस्य मूलभूतप्रयोजनं गणितेन ग्रहानयनमेव। अस्माकं प्राचीनमहर्षिभिः दिव्यचक्षुषा सततावलोकनपद्धत्या (वेधेन) च ग्रहाणामानयनं कृतमस्ति। तद्बलेन तत्र ग्रहाणां युगे कल्पे वा भगणाः अर्थात् (द्वादशराशिसमूहः) पठिताः सन्ति, तेनैवाधारेण युगस्य गणनां कृत्वा वर्तमानदिने ग्रहाणां स्थितिज्ञानार्थं दिनगणमावश्यकं भवति। अतः सर्वप्रथमं ग्रहज्ञानार्थं अहर्गणानयनं सर्वप्रथमं क्रियते। यतो हि ग्रहाणां द्वादशराशिभागो भगणाः कथ्यन्ते। यदि अद्य ग्रहस्थितिं ज्ञानम् अपेक्ष्यते चेत् तदा कल्पारम्भात् अद्य यावत् कियद्दिनं गतमित्येव कल्पारम्भात् वर्तमानदिनं यावत् दिनसमूहः एवाहर्गणः। वस्तुतः ज्योतिषशास्त्रे सिद्धान्त-तन्त्र-करणग्रन्थानुसारेण अहर्गणानयनं क्रियते। प्रसङ्गवशात् अस्य विवेचनमपि क्रियते। तत्र कल्पादेः यत्र ग्रहानयनं स सिद्धान्तः, यत्र युगादेः ग्रहानयनं तत्तन्त्रम्, इष्ट-शकादितः यत्र ग्रहानयनं क्रियते तत् करणमिति अभिधीयते। एवं त्रिष्वपि सिद्धान्तेषु प्रक्रिया पृथक् पृथक् दृश्यन्ते। परन्तु सर्वास्वपि प्रक्रियासु गणितोत्पत्तिः समाना एवोपलभ्यते। सम्प्रति ग्रहानयनस्य प्रक्रिया करण-ग्रन्थाधारेण भवति।

सर्वेष्वपि सिद्धान्तग्रन्थेषु कुदिने ग्रहाणां भगणाः पठिताः सन्ति, तद्वशात् ग्रहाणां दैनिकगतिः अनुपातेन सरलतया ज्ञातुं शक्यते, परन्तु केवलं गतिज्ञानेन वर्तमानस्थितिज्ञानं न कदापि सम्भवति। अतः त्रैराशिकगणितबलेन तृतीयराशिः ज्ञायते। अहर्गणानयनं तु चान्द्रसावननाक्षत्रसौरभेदाच्चतुर्विधमस्ति। तत्र रवेः क्रान्तिवृत्तस्य कांशभोगेन सौरः, रविचन्द्रयोः द्वादशान्तरेण एकतिथिभोगेन चान्द्रः, सूर्योदयादुदयं यावत्सावनम्, भोदयेन भास्तपर्यन्तं नाक्षत्रमिति चतुर्षु मनुजव्यवहार्येषु अन्यसाधनसापेक्षत्वे अपि ग्रहादिसाधनाय सर्वैः प्राचीनार्वाचीनैराचार्यैः सावनात्मक एवाहर्गणः प्रसाधितः।

तत्र सौरचन्द्रयोरन्तरमधिदिनानि चान्द्रसावनयोरन्तरं च क्षयदिनानि कथ्यन्ते। यदि सूर्योदयसमये एव रविचन्द्रौ मेषादिस्थौ गताविति, तदा युगपत् सौरसावननाक्षत्रचान्द्रदिनानां प्रवृत्तिर्जातेति सुविदितमेव। तदानीं रवेः राश्यादिगतत्वात् सौरदिनादिः "उदयादुदयं भानोः सावनं

दिनमुच्यते"[1] अनेन सावनदिनादिः, तत्र यन्नक्षत्रं तदानीम् उदयक्षितिजस्थं तदुदयान्नाक्षत्रदिनादिः, रविचन्द्रयोरेकत्रगतत्वत्तदानीं "दर्शः सूर्येन्दुसङ्गमः"[2] इति परिभाषया अमान्तकाल-घटनेन चान्द्रदिनादिः अपि सञ्जातः ।

ततः प्रवाहगत्या पश्चिमाभिमुखं गच्छन् सूर्यो यदा पुनः उदयक्षितिजे समागतः "तदा इनोदयद्वयान्तरं तदर्कसावनं दिनम्"[3] इति परिभाषया एकसावनदिनस्य पूर्तिर्जाता, नाक्षत्रं दिनं तु इतः पूर्वमेव पूर्णं जातम्, यतो हि तन्नक्षत्रं रवितः पश्चिमगतं वर्तते। अतः तन्नक्षत्रादेकसावनसम्बन्धिगतिकलया पूर्वदिशि अन्तरितो रविः उदयक्षितिजे अस्ति इति ज्ञायते। तदा च रवेः प्राग्भागे गत्यन्तरकलाभिः चन्द्रो वर्तते, तत्र एकसावनदिने रविगतिः 59'/8" चन्द्रगतिः 790'/35" अनयोः अन्तरम् 7317'/27" इदं द्वादशसङ्ख्याभिः विभज्यते = (50 + (11/27))/12।

अस्य षष्टिघट्यधिकदर्शनाद् इतःपूर्वमेव चान्द्रदिनस्य पूर्तिः जाता। तथा च तत्र एकसावनदिनसम्बन्धीया रविगति 59'/8" इयम् एकांशाल्पा, अर्थात् एकांशभोगेन एकं सौरदिनं भवति, तेन सौरदिनस्य पूर्तिः जाता, अतः अनेन ज्ञायते यत् सौरदिनात् अल्पं सावनदिनम्। सावनदिनात् अल्पं चान्द्रदिनम् इति। यदा कस्यापि पदार्थस्य यथा यथा अल्पसङ्ख्यया मापनं क्रियते तथा तथा तन्मापनसङ्ख्याः अधिका जायते इति प्रमाणाधारेण कल्पप्रमितकालस्य पृथक्-पृथक् चान्द्रसावनसौरदिनप्रमाणैः विभक्तसङ्ख्यया उत्तरोत्तरम् अल्पा स्यात्। तथा अत्र कल्पे चान्द्रदिनसङ्ख्या सावनसौरदिनसङ्ख्यातः अधिका। तत्रापि सावनदिनसङ्ख्या सौरदिनसङ्ख्यातःअधिका एव।

अत्र केवलं रविसावनवशेनैव दिनरात्र्योः प्रत्यक्षदर्शनात् रविसावनदिनगणः एव अहर्गणः साधितः। अथ सौरचान्द्रान्तरम् अधिशेषं, चान्द्रसावनयोः अन्तरम् अवमिति परिभाषया त्रैराशिकं क्रियते अत्र सौरचान्द्रसावनेषु तिसृषृ राशिषु साजात्यात् कल्पाधिशेषावमाभ्यामन्यराशिज्ञानं भवति इत्यत्र नैव कोऽपि त्रैराशिकयुक्तिः निवारयितुं शक्यते। साजात्येषु समानसम्बन्धत्वनिश्चयात्। अतः अत्र प्रथमं कल्पादितः अभीष्टदैवसिक अहर्गणानयने तद्विनिगमकाः सौरमासाः साध्यन्ते।

यथोक्तं सूर्यसिद्धान्ते अहर्गणानयनम् –

अत उर्ध्वममी युक्ता गतकालाब्दसङ्ख्यया।
मासीकृता युता मासैर्मधुशुक्लादिभिर्गतैः ।।

---

[1] सू०सि०म०अ०, श्लो०सं० 36।

[2] अमरकोशः।

[3] सि०शि०म०अ०का०मा०अ०, श्लो०सं० 20।

पृथकस्थास्तेऽधिमासाघ्नाः सूर्यमासविभाजिताः ।
लब्धाधिमासकैर्युक्ता दिनीकृत्य दिनान्विताः ।।

द्विष्टास्तिथिक्षयाभ्यस्ताश्चान्द्रवासरभाजिताः ।
लब्धोनरात्रिरहिता लंकायामार्धरात्रिकः ।।

सावणो द्युगणः सूर्याद्दिनमासाब्दपास्ततः ।
सप्तभिः क्षयितः शेषः सूर्याद्यो वासरेश्वरः[4] ।।

अत्रोपपत्तिः — कल्पादितो अभीष्टशकान्तं यावत् सौरवर्षम् आनीय द्वादशसङ्ख्ययाभिः गुणितानि सति गतसौरमासाः भवन्ति, पुनः चन्द्रादिगतमासा संयोजनेन इष्टसौरमासा आगच्छन्ति। पुनः अधिमासस्य आनयनं क्रियते, अत्र कल्पादितो गतसौरमासाः चान्द्रमासे परिवर्तनीयं यतो हि दर्शाग्रसंक्रान्तिकालयोः अन्तर्वर्त्तिना अधिमासाः शेषेणाधिकाः भवन्ति।

"दर्शाग्रतः संक्रमकालतः प्राक् सदैव तिष्ठत्यधिमासशेषम्"[5] इति भास्कराचार्यवचनम्। अतः त्रैराशिकगणितबलेन अधिमासमानं साध्यते, यदि कल्पसौरमासैः कल्पाधिमासाः लभ्यन्ते तदा अभीष्टसौरमासैः के इति

(क़०अ०म० x अ०सौ०मा०)/मा० कल्पसौरमासः

अभीष्ट अधिमासाः लभ्यन्ते, पुनः इष्टसौरमासे अधिमासयुते सति इष्टचान्द्रमासाः भवन्ति

इ०सौ०मा०+अधिमासः = चान्द्रमासः + (अ०शे०/यु०सौ०मा०)

अतः अभीष्टगत अमान्तकाले चान्द्रमासाः सावयवाः

इसौ०मा० x इ०अमा० + (अ०शे०/यु०सौ०मा०)

अत्र वर्षान्ते यैः अधिमासाः साध्यन्ते तदा शेषैर्यदि इष्टसौरमासा संयोजनं क्रियते तदा अभीष्ट-संक्रान्तिकालिकाः चान्द्रमासाः भवन्ति। तत्र वर्षान्तकालिकचान्द्रमाससमाने वर्षान्ताधिशेषशोधनेन चैत्रमान्तकाले चान्द्रमासाः सिद्धाः स्युः। अर्थात् अनुपातेन आगता केवलम् अधिमासैः एव ते कल्पगतसौरमासयुक्ताः तदा चैत्रमासा अमान्तकाले गतचान्द्रमासा भवन्ति। अतः अभीष्ट-अमान्तीयचान्द्रमासगणः = इ०सौ०मा० + इ०अ०मा०। ते चान्द्रमासाः भवन्ति, पुनः ते चान्द्रमासाः त्रिशद्गुणिते सति दर्शान्ते चान्द्रदिवसा (तिथयः) भवन्ति। तेषु दर्शान्तात् इष्टदिनादधिका या गततिथयः ताः यदि योज्यन्ते तदा गततिथ्यन्तकाले चान्द्र अहर्गणः स्यात्। चान्द्रदिनेभ्यः सावनदिनम् आनयनार्थम् अनुपातेन चान्द्रसम्बन्धी अवम आनीय अत्र विशोध्यते तदा तिथ्यन्ते

---

[4] सू०सि०म०अ०, श्लो०सं० 48-51।

[5] सि०शि०गो०अ०मा०वा०, श्लो०सं०-16।

सावयवाः सावनाहर्गणः स्यात्। यथा — यदि पठितयुगचान्द्रदिनैः पठितयुगावमानि लभ्यन्ते तदा एभिः अभीष्टचान्द्रदिनैः कानीति

(यु०अवम x इ०चा०दि०)/यु०चा०दि० = अवम + (अ०शे०/यु०चा०दि०)

अत्र चान्द्राणां सावनानाञ्चान्तस्यैवावमसंज्ञात्वादेभिः सावमसेषैरिष्टावमैर्यदिचान्द्रदिवसा ऊनाः क्रियन्ते तदा गततिथ्यन्तकाले ते सावनदिवसा भवेयुः। अतः तिथ्यन्ते सावनाहर्गणः सावयवः

इ०चा०-अवम अवम/यु०चा०

परन्तु "उदयादुदयं यावद्भूमिसावनवासराः"[6] इति सावनदिनपरिभाषया सावनाहर्गणोऽर्कोदयकालिकोऽपेक्षितोतः यथोक्तं भास्कराचार्येण —

तिथ्यन्तसूर्योदययोस्तु मध्ये सदैव तिष्ठत्यवमावशेषम्।
त्यक्तेन तेनोदयकालिकः स्यात् तिथ्यन्तकाले द्युगणोऽन्यथातः[7]।।

अत्र तिथ्यन्तकालिकेऽस्मिन्नहर्गणे तिथ्यन्तार्कोदयान्तर्गतोऽवमशेष कालो यदि योज्यन्ते तदा अर्कोदयकालिको अहर्गणो भवेत्। तत्र पूर्वम् अवमशेषो विशोधितम् अधुना योजितश्चेत् तस्य तुल्यधनर्णनाशात्केवलं लब्धितुल्यावमैरेव चान्द्राहर्गणो रहितोऽभीष्टार्कोदयकाले सावनाहर्गणो जायते। अत एकोक्तं भास्कराचार्येण "अधिकमासदिनक्षयशेषतो द्युघटिकादिकमत्र न गृह्यते"[8] इति। अत एव अधिशेष अवमशेषस्य च परित्यागः कृतः वर्तते।

अत्र अहर्गणानयने भास्कराचार्येण-वर्षान्तकाले गतसौरवर्षाणि द्वादशगुणितानि कृत्वा गतसौरमासान् प्रसाध्य तेषु चैत्रादिगतचान्द्रसङ्ख्यकान् सौरमासांश्च संयोज्य अमान्तसमसङ्ख्यकसंक्रान्तिकालिकसौरमासान् संसाध्य त्रिंशद्भिः संगुण्य गततिथिसमसङ्ख्यकान् अंशाश्च संयोज्य गततिथिससङ्ख्यकभागान्तकालिकसौराहर्गणं प्रसाध्य ततश्चान्द्रार्थम् अनुपातेन अधिमासम् आनीय तान्दिनात्मकान् कृत्वा तत्र संयोज्य ततः क्षयदिनान्यानीय अभीष्टदिनोदये मध्यमसावनाहर्गणः साधितः।

अथ अहर्गणस्य वारनियामकत्वात् सप्तभक्तावशेषितेऽहर्गणे शेषांकप्रमितो रव्यादिको वारो भवति। कल्पादौ रविवासरात्वात्। यथोक्तं भास्कराचार्येण —

लंकानगर्यामुदयाच्च भानोस्तस्यैव वारो प्रथमं बभूव ।

[6] सू०सि०म०अ०, श्लो०सं० 36।

[7] सि०शि०गो०अ०मा०वा०, श्लो०सं० 18।

[8] सि०शि०म०अ०ग्र०अ०, श्लो०सं० 3।

मधोः सितादेः दिनमासवर्षयुगादिकानां युगपत्प्रवृत्तिः ।।[9]

अपि च स्पष्टार्कसंक्रान्तिरहितत्रिंशत्तिथ्यात्मकचान्द्रमासाः स्पष्टोऽधिमासाः तथा माध्यमिकगणनायां साधारणतया सार्धद्वात्रिंशद्भिः सौरमासैर्योऽधिमासः प्रचलति स च गणितागतो मध्यमो अधिमासः कथ्यते। मध्यस्फुटार्कयोः अल्पान्तरे सम्भवति एकस्मिन्नैव चान्द्रमासे मध्यस्फुटाधिमासयोः पतनम्। बह्वन्तरे तु अत्र एवं न सम्भवति, अर्थात् स्पष्टाधिमासपाते अपि हरासन्नशेषत्वेन गणिते तत्रागच्छति चेत् तत्र अहर्गणोक्तदिशा साधिताधिमासे निपतिताधिमासस्याग्रहणात् अधिमासग्रहणे सङ्ख्ययैकाल्पत्वग्रहणेन सैकोऽधिमासः कार्यः। यत्र च शेष्यात्यल्पतया गणितेन लब्धेऽप्यधिमासे स्फुटोऽधिमासो न पतति तत्र अहर्गणानयने अधिमासस्य सङ्ख्ययैकाधिकग्रहणान्निरेको अधिमासः कर्तव्यः। अत एवोक्तं भास्कराचार्येण —

स्पष्टोऽधिमासः पतितोऽप्यलब्धो यदा यदा वाऽपतितोऽपिलब्धः ।
सेकैर्निरेकैः क्रमशोऽधिमासैस्तदा दिनौघः सुधिया प्रसाध्यः ।।[10]

एवञ्च चैत्र अमान्ततः अभीष्टतिथ्यन्तावधिं मध्यमतिथिज्ञानाभावात् अहर्गणानयने पञ्चाङ्गता स्पष्टा एव तिथयो गृहीताः। अर्थात् स्फुटतिथिसंख्यासमामेव मध्यमतिथिसङ्ख्याम् अङ्गीकृत्य अहर्गणानयनं कुर्वन्ति आचार्यैः। एवमेव मध्यमस्फुटतिथिभेदेनापि अनेकानुपातागतावमप्यन्तरितं स्यादिति तदानीमहर्गणोऽप्येकान्तरितो भवेत् अतः तथा अहर्गणे वारस्यैव नियामकत्वात् सेकौ निरेकश्च कार्यस्तदा स्ववारे सः कल्पादितः द्युगणः स्यात्। यथोक्तं भास्कराचार्येण—

अभीष्टवारार्थमहर्गणश्चेत् सैको निरेकस्तिथयोऽपि तद्वत्[11] इति।

एवं सृष्ट्यादेः "षण्मनूनां तु सम्पीड्ये"[12]त्यादि महत् अहर्गणवशेन अतिकठिनविधिना अहर्गणमानं बृहत्सङ्ख्यकाः सम्भवन्ति अतः सुलभार्थं सर्वजनव्यवहारोपयुक्तः अभीष्टशकादितः इष्टतो युगात् वा अहर्गणः साध्यते बहुत्र। यथा "शाको नवाद्रीन्दुकृशानुयुक्तः कलेर्भवेदब्दगणो व्यतीतः"[13] इत्यादिः तथा सूर्यसिद्धान्ते —

विस्तरेणैतदुदितं संक्षेपात् व्यवहारिकम् ।
मध्यमानयनं कार्यं ग्रहाणामिष्टतो युगात् ।।[14]

तथा च भास्कराचार्येण —

---

[9] सि०शि०म०अ०का०मा०, श्लो०सं० 15।

[10] सि०शि०म०अ०अ०मा०नि०, श्लो०सं० 3।

[11] सि०शि०म०अ०अ०मा०नि०, श्लो०सं० 1।

[12] ब्र०सि०स०अ०, पृ०सं० 24।

[13] सू०सि०म०अ०, श्लो०सं० 56।

[14] सि०शि०म०अ०ग्र०अ०, श्लो०सं० 18।

कलिगतादथ वा दिनसञ्चयो दिनपतिर्भृगुजप्रभृतिस्तदा।
कलिमुखध्रुवकेण समन्वितो भवति तद्द्युगणोद्भवखेचराः।।[15]

तथा च लाघवार्थं कल्पादितो वर्षान्तपर्यन्तं एकोऽहर्गणः साधितः तत् साधितो ग्रहो वर्षान्ते सिद्धः। स ध्रुवसंज्ञः, तथा च वर्षान्तात् इष्टदिनोदयं यावल्लघ्वहर्गणः साधितो लाघवार्थम्। तदुत्पन्नग्रहः वर्षान्तकालिकध्रुवकेण संयुतस्सन् कल्पादितः इष्टदिनोदयं यावदहर्गणः सिद्धः।

अत एव ग्रहाणां साधने गणितादिकार्ये वा लाघवविधिः एव अङ्गीक्रियते । एवमत्र इदानीं प्रसिद्धकरणग्रन्थः ग्रहलाघवः तस्य प्रसारः प्रचारश्च सम्पूर्णेऽपि भारते ज्योतिषलोके प्राप्यते। तत्र सृष्ट्यादितः इष्टदिनोदयावधिककालस्य खण्डत्रयं कृत्वा लाघवार्थं दिनगणः साधितः यथोक्तं अहर्गणानयनम्-

द्वयब्धीन्द्रोनितशक् ईशहतफलं स्याच्चक्राख्यं रविहतशेषकं तु युक्तम्[16]

अत्र सृष्ट्यादितो ग्रन्थारम्भसमयपर्यन्तकालखण्डसम्बन्धीयम् अहर्गणं प्रसाध्य तदुत्पन्नग्रहराश्यादिः क्षेपः कल्पितः।

ग्रन्थारम्भात् इष्टगतासन् वर्षान्तं यावत् वर्षसमूहे एकादशवर्षात्मकं कालखण्डं चक्रसंज्ञकं कल्पितं तत्र एकचक्रसम्बन्धिग्रहराश्यादिलाघवार्थं द्वादशसंख्यया शुद्धं कृत्वा धृवसंज्ञः कल्पितः।

ततश्चक्रोर्वरितवर्षसंबन्ध्यहर्गणं प्रसाध्य तत्सिद्धो ग्रहो चक्रसंबन्धिग्रहेण हीनः क्षेपेण युतस्सन् कल्पादितः इष्टदिनोदयसमयपर्यन्तकालसम्बन्धी ग्रहो जातः यथोक्तं —

दिनगणभवखेटश्चक्रनिघ्नध्रुवोनो दिवसकृदुदये स्वक्षेपयुक् मध्यमः स्यात्[17]। इति।।

प्रसङ्गेऽस्मिन् आचार्यभास्करेण लघ्वहर्गणः साधितः तत्रोक्तं —

चैत्रासितादिगतस्तिथिसङ्घः शोधितशुद्धिरधस्तु समेतः ।
स्वीयकराभ्रतुरङ्गलवेन क्षेपयुतः कृतषट्कविभक्तः ।
लब्धदिनक्षयवर्जितशेषो रव्युदये द्युगणोऽब्दपः स्यात् ।।[18]

अत्र आचार्येण लघ्वहर्गणंकृत्वा तत्र वारस्य गणना तु सदा अब्दपतेः शकाशात् कृता। यत्र वर्षाधिपेन गणना क्रियते। वस्तुतः अहर्गणसाधने महत् कष्टं परिश्रमं च अनुभूयते। अत एवोक्तं "ग्रहास्तु साध्या मनुजैः स्वमानात्" इति। अत एव ग्रहाणां साधने गणितादिकार्ये वा

---

15 ग्र०ला०व०म०अ०, श्लो०सं० 4।
16 ग्र०ला०व०म०अ०, श्लो०सं०-9।
17 सि०शि०म०अ०प्र०शु०, श्लो०सं० 12-13।
18 ज्यो०नि०आ०, पृ०सं० 30।

लाघवविधिरेवाङ्गीक्रियते ।

**सहायकग्रन्थानां सूची**

अमरकोशः, अमरसिंहः।

ग्रहलाघवं करणम्, गणेशदैवज्ञविरचितम्, पं० श्रीः कपिलेश्वरशास्त्रिणा सम्पादितः, चौखम्बा सुरभारती प्रकाशन ।

ज्योतिर्निबन्धादर्शः, डॉ. शत्रुघ्नत्रिपाठी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी।

ब्रह्मस्फुटसिद्धान्तस्य समीक्षात्मकमध्ययनम्, विद्यावाचस्पति डॉ शिवाकान्त झा, नाम पब्लिशर्स्, दिल्ली ।

सूर्यसिद्धान्तः, कपिलेश्वरशास्त्रिटीकाकारः, चौखम्बा विद्याभवन्, वाराणसी।

सूर्यसिद्धान्तः, सुधावर्षिणीटीकासहितः, म०म०पं० सुधाकरद्विवेदी सम्पादितः, चौखम्बा विद्याभवन् वाराणसी।

सिद्धान्तशिरोमणिः भास्कराचार्यविरचितः, पं० श्रीः मुरलीधरठक्कुरेण सम्पादितः, चौखम्बा सुरभारती प्रकाशन।

सिद्धान्तशिरोमणिः मरीचिभाष्यसंवलितः।

# 23

## सिद्धान्तोक्तकालगणनप्रक्रियायां ब्रह्माण्डव्यवस्था

*के. सी. नागेश भट्टः*

**प्रबन्धस्य मुख्यविषयः**

1. भारतीयज्योतिषसिद्धान्तोक्तकालमानविषयाणां तथा क्षीरपथस्य च सम्बन्धनिरूपणम्

2. आधुनिकविज्ञानेन अन्वेषणीयाः अन्ये च विषयाः

त्रुट्यादितः प्रलयकालपर्यन्तं भारतीयज्योतिर्विज्ञाने कालगणनपरिभाषा उक्ता वर्तते। तत्र त्रुट्यादयः अमूर्तकाले अन्तर्भवन्ति। प्राणादयः मूर्तकाले अन्तर्भवन्ति। तत्र घटी-दिन-मास-वर्षाणां निर्णयः धरा-तथा-सूर्ययोः परस्परसम्बन्धेन उपजायते। तथैव वर्षमानानन्तरस्य युग-महायुग-मन्वन्तर-कल्प-परार्ध-परा पर्यन्तमपि कालपरिमाणपरिभाषा स्पष्टतया निरूपिता वर्तते भारतीयगणितविज्ञाने। एतेषां युगादिमानानामपि प्राकृतिकरूपो कश्चनसम्बन्धः विद्यते एव इति अत्र तर्कः। यथापूर्वं आवर्षं यावत् कालमानव्यवस्थायां भूमि-सूर्ययोः सम्बन्धः सुनिश्चितः तथैव युगादिव्यवस्थायां अस्य सूर्यस्य तथा क्षीरपथस्य च महान एको सम्बन्धः विद्यते एव।

एवं भारतीयज्योतिषसिद्धान्तोक्तकालमानविषयाणां तथा क्षीरपथस्य च सम्बन्धनिरूपणम् तथा आधुनिकविज्ञाने अन्वेषणीयाः अन्ये च विषयाः अस्मिन् सिद्धान्तोक्तकालगणनप्रक्रियायां ब्रह्माण्डव्यवस्था इति शीर्षिकारूपप्रबन्धे चित्रसहितं व्याख्यातुमिच्छामि।

विष्णोः विष्णोः विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणः प्रथमे परार्धे पञ्चाशद्वत्सरेषु अतीतेषु द्वीतीयपरार्धे प्रथमे वर्षे श्रीहरेः श्वेतवराहकल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथमपादे — जम्बूद्वीपे भरतखन्डे भरतवर्षे महामेरोः दक्षिणपार्श्वे – अस्मिन् वर्तमानकालव्यावहारिके — संवत्सरस्य उत्तरायणे शिशिरर्तौ माघमासे शुक्लपक्षे द्वादश्यां शुक्रवासरे —

भोः आदरणीयाः विद्वांसः! किमर्थमेवं संकल्पः क्रियते अनेन? किमधुना धार्मिककार्यः? इति मां तर्जयेयुः प्रायः सर्वे।

परमत्रप्रकृतिप्रपञ्चस्य, निखिलामलसृष्टेः, औचित्यपूर्णप्राकृतिकविज्ञानसन्दोहस्य ज्ञानस्रोतः एव अव्याहतप्रवाहरूपेण प्रवहिता वर्तते भारतीयसंस्कृतिसागरात्। यदत्र भारतीयैः क्रियमाणे संकल्पे जगदुत्पत्तिकालादारभ्य अद्य-अधुना-इदानीन्तनक्षणकालपर्यन्तमपि नैरन्तर्येण प्रपञ्चस्य वा अस्य ब्रह्माण्डस्य कालगणना सुष्ठु निरूपिता वर्तते।

कालगणनार्थमेव प्रवृत्तेऽस्मिन् ज्योतिर्विज्ञाने कालमानास्तु नवधा प्रकीर्तितः। तथाह सू. सि ब्राह्मं दैवं तथा पैत्र्यं प्राजापत्यं गुरोस्तथा। सौरञ्च सावनं चान्द्रं आर्षं मानानि वै नव। इति एतादृशस्य संकल्पस्य, कालमानस्य तथा ब्रह्माण्डस्य च अर्थात् universe इति यद् वदामः तस्य च कश्चन संबन्धः स्यादेव।

अतोऽत्र प्रबन्धे एते विषयाः प्रतिपाद्यन्ते —

1. अस्माभिः प्रतिनित्यं दृश्यमाणः कालसूचकांशाः
2. ब्रह्मान्डकालसूचकाः अंशाः
3. एतयोः उभयोरपि प्राकृतिककालमापकानि
4. पूर्वाचार्याणां ब्रह्माण्डज्ञानम्
5. आधुनिकविज्ञानमतम्
6. आधुनिकविज्ञानेन गवेषणीयाः विषयाः इति एतान् विषयान् यथामति यथासमयावकाशं विद्वत् परिषदि संस्थापयामि। भोः मान्याः, पूर्वोक्तकालमानव्यवस्थायां अंशद्वयम् अवगन्तव्यम् अस्माभिः।
    1. अद्यब्रह्मणः परा, परार्धः कल्पः मन्वन्तरम्, युगमानम् इति। एते ब्रह्माण्डकालसूचकाः भवन्ति।
    2. संवत्सर, अयन, रुतु, मास, पक्ष, तिथि घट्यादयः वर्तमानकालसूचकाः भवन्ति। तत्रभवतां सुविदितोऽयं विषयः यः द्वितीयोक्तानां संवत्सर, अयन, रुतु, मास, पक्ष, तिथ्यादीनां कालमापकाः भवन्ति सूर्यचन्द्रौ एव इति। तत्र नक्षत्रोदयकालात् पुनस्तदेव नक्षत्रोदयकालं यावत् 60 घट्यात्मकं नाक्षत्रं दिनमानं भवति। तथैव सूर्योदयकालात् पुनरुदयकालं यावत् सावनदिनमानं भवति। तदेव भूमेः अक्षपरिभ्रमणं इति कथ्यते। अक्षपरिभ्रमणात्मकानां त्रिंशद्दिनानां एको मासः।

भूमेः अथवा सूर्यस्य उत्तर-दीक्षणदिग्गमनमेव अयनकालमानम्। तथा सूर्यस्य भचक्रे भ्रमणकालः एव वर्षशब्देन व्यपदिश्यते। अर्थात् भूमिः येन कालेन परिभ्रमति सः कालः वर्षमिति कथ्यते। यथोक्तं च भास्करीये "रवेश्चक्रभोगोऽत्र वर्षं प्रदिष्टम्" इति।

एवञ्च व्यवहारयोग्यानां घटी-तिथ्यादीनां निर्णयः रवि-धरण्योः परस्परपरिभ्रमणवशात्

भवतीति अर्थः। एवमेव संवत्सरानन्तरस्य महायुग-मन्वन्तर-कल्प-पराणां तथा अस्माकं सौरमण्डलस्य च कश्चन संबन्धः पूर्वजैः गृहीतः इति मम तर्कः।

तत्र प्रथमतः पर-परार्धानां मानविचारः, युगादीनां मानानां सङ्ख्याः दिव्यमानेन प्रोक्ताः। मानवानां यद्वर्षं तद्देवानां दिनम्। सुरासुराणामन्योऽन्यं अहोरात्रं विपर्ययादिति वचनेन भूमौ एव ध्रुवस्थानस्थितानां सूर्यस्य दर्शन-अदर्शनकालमनुसृत्य एव दिनप्रमाणं कथितम्। अतः मानववर्षैः 360 देवानां एकं वर्षं भवति। एतेषां दिव्यवर्षाणां द्वादशसहस्राणां एको महायुगः भवति।

(12,000 X 360 = 4,320,000 मानववर्षाणि)

एतादृशानां महायुगानां एकसप्तत्या एकं मन्वन्तरं भवति।

युगानां सप्ततिःसैका मन्वन्तरमिहोच्यते इत्युक्तं च सिद्धान्ते।

12,000 X 71 = 8,52,000 दिव्यवर्षाणि।

मानववर्षैः तावत् 30,672,000 भवन्ति।

# 24

## सिद्धान्तग्रन्थानां यन्त्रालयैस्सह सम्बन्धः

*कृष्णेश्वर झा*

वादीप्रतिवादिभ्यां निर्णीतोऽर्थः सिद्धान्तः। प्रयोगपरम्परानुरोधने प्राप्तसिद्धनिष्कर्षः सिद्धोऽन्तो निर्णयो यस्यासौ सिद्धान्त इति सामान्यपरिभाषा। ज्यौतिषस्य मुख्यभागः मुख्यस्कन्धो वा गणितसिद्धान्त इति। ज्यौतिषस्य वेदाङ्गत्वं निरुपयन् भास्करः वक्ष्यति —

वेदास्तावद्यज्ञकर्मप्रवृताः कालानुपूर्वा विहिताश्च यज्ञाः।
यस्मादिदं कालाविधानशास्त्रं यो ज्यौतिषं वेत्ति स वेद यज्ञान्।।

इत्यनेन वेदाः यज्ञकर्मप्रवृताः निरूपिताः। सर्वविधप्राकृतिकाः सृष्टि स्थिति विकास संहाररूपविश्वगतयज्ञाः कालाश्रिताः। मानवीययज्ञाश्चापि कालोऽनुपूर्वाः निहिताः। यस्मादिदं कालविधानशास्त्रमतः यो ज्यौतिषं वेत्ति स वेदयज्ञानपि वेत्ति।

तर्हि कोऽयं कालः? ज्यौतिषस्य कालविधायकत्वं कथम्? कथं ज्यौतिषज्ञानेन वैदिकयज्ञानां ज्ञानमिति प्रश्नानां समाधानरूपेण त्रिस्कन्ध-ज्यौतिषं प्रवर्तते।

कालः पचति भूतानि सर्वाण्यैव सहात्मना।
कान्ते सपक्वस्तेनैव सहाव्यक्ते लयं व्रजेत्।।

इत्यनेन कालस्य भूतानां पाचकत्वं कालसापेक्षत्वेन ब्रह्मादिनादौ सृष्टिस्तद्दिनान्ते लयश्च सूच्यते। परं कथमिति प्रश्नस्योत्तरे सर्वाः भौतिकाध्यात्मिकाविद्यास्तदन्तर्भुक्ताः जायन्ते।

कलयति लोकानिति कालस्य सामान्यपरिभाषा।
कालस्य कलनकर्त्तृत्वादस्य कलनशास्त्रमित्यपरनाम।।

ज्यौतिषां ग्रहर्क्षतारादीनां प्रबोधकं कालज्ञानविधायकं यज्ञकालनिरूपकत्वेन वेदाङ्गभूतं नेत्ररुपञ्चेदं शास्त्रम्। इदं त्रिस्कन्धात्मकं केचनमते पञ्चस्कन्धात्मकञ्च विद्यते। विश्वस्य समस्तप्रयोगात्मकविज्ञानानि ज्यौतिषेन ज्यौतिषं गणितेन युक्तमिति। यथा कथितं भास्करेण —

अस्ति त्रैराशिकं पाटीबीजञ्च बिमला मतिः।
किमज्ञातं सुबुद्धीनामतो मन्दार्थमुच्यते।

द्विविधगणितमुक्तं व्यक्तमव्यक्तयुक्तम्।
तदवगमननिष्ठ शब्दशास्त्रै पटिष्ठः।।

यदि भवति तदेदं ज्यौतिषं भूरिभेदम्।
प्रपठितुमधिकारी सोऽन्यथा नामधारी।।

इति श्लोकद्वयेन पाटीगणितस्य त्रैराशिकं मूलं बीजंगणितस्य विमला मतिश्च। तयोर्ज्ञानेन सुबुद्धीनां किमज्ञातमर्थात् किमपि च।

व्यक्तमव्यक्तञ्च विविधगणितं शब्दशास्त्रे च सम्यक् ज्ञात्वा भूरिभेदं ज्यौतिषं पठितुं शक्यतेऽन्यथा नामधारिमात्रं भवति। अधुना नामधारी परम्परा गणितगोलादिभिर्विना सर्वत्र परम्परागतशिक्षणे वर्धते। सिद्धान्त-ज्यौतिषस्य स्वरूपं यन्त्रालयैः सिद्धान्तग्रन्थानां सम्बन्धश्चेति विषयमलं किञ्चित् विचारयामि। भास्करात्पूर्वसिद्धान्तग्रन्थेषु प्रयोगानुरोधेन गणितगोलः संस्थानमानसंचारादयः गोलीयगणितं गोलीयोपपत्तिश्च तथा ग्रहर्क्षसंस्थानं सोदाहरणप्रश्नोत्तरविधानं यन्त्रविधानं वेदविधानञ्च प्राप्यते। तत्र भास्करीयसिद्धान्तलक्षणम् —

त्रुट्यादिप्रलयान्तकालकलनामानप्रभेदः क्रमा-
च्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः।।

जानन् जातकसंहिताः सगणितस्कन्धैकदेशा अपि ज्यौतिः
शास्त्रविचारसारचतुरप्रश्नेष्वकिञ्चितकरः।
यः सिद्धान्तमनन्तयुक्तिविततं नो वेति भितौ
यथा राजा चित्रमयोऽथवा सुघटितः काष्ठस्य कण्ठीरवः।।

गर्जत्कुञ्जरवर्जिता नृपचमूरप्यूर्जिताऽश्वादिकै-
रूद्यानं च्युतचूतवृक्षमथवा पाथोविहीनं सरः।
योषित्प्रोषितनूतनप्रियतमा यद्वन्न भात्युच्चकै-
र्ज्योतिः शास्त्रमिदं तथैव विबुधाः सिद्धान्तहीनं जगुः।।

एभिः — सिद्धान्तस्य स्वरूपं विस्तारः सर्वविश्वाभिप्रायिकमहत्वञ्च प्रस्फुटत्वमेति यथा —

1. कालकलनम् — त्रुटिकालात्प्रलयान्तम्।
2. मानप्रभेदाः — अनन्तकाले नवविधकालभेदाः तैः सम्बद्धाः क्षेत्रभेदाश्च।
3. धुसदां ग्रहर्क्षकेत्वादीनां चारस्तत्र — गणित्तीयप्रतीतिः चाक्षुषवेधोपलब्ध-दृग्गणितैक्यं यान्त्रिकवेद्योपलब्धदृग्गणितैक्यञ्च। गोलीयगणितं गोलीय-यन्त्रवेधश्च प्रयुज्यन्ते।
4. द्विविधगणितम् — व्यक्तमव्यक्तंनाम पाटीगणितं बीजगणितञ्च। गणितीय विस्तारस्त्वनन्तं यावदस्ति नान्तोऽस्ति यस्मात् गणितार्णवस्येति भास्करः।
5. सोत्तराः प्रश्नाः भूग्रहोपग्रहनक्षत्रादीनां संस्थानं दूरत्वं स्थितिश्च संस्थानमित्यस्याप्यनेके प्रभेदाः सत्तात्मकाः विश्वस्यानन्त्यात् भवन्ति।
6. यन्त्रविधानं यन्त्राध्यायः यन्त्रनिर्माणां विविधप्रयोगाः खगोलीयवेधोपयुक्तयन्त्राणां निर्माणं प्रयोगः गोलीयरहस्योद्घाटकत्वेन निष्कर्षावगमनं दृग्गणितैक्यविधानञ्च यन्त्रं विना न सम्भवत्यतः त्रिस्कन्धज्यौतिषं गणितमूलेन गोलेन यन्त्रेण, विमलबुद्ध्या च गम्यं नान्यथेति। एवं यन्त्रविज्ञानस्य स्वतन्त्रपरम्परा, महत्वं सर्वविधाभिप्रायिकत्वञ्च सिद्ध्यति। यतःषडङ्गो वेदोऽध्येयो ज्ञेयश्चेति परम्परा स्वतन्त्रतादनन्तरमपि न सञ्चालितातः भारते अशिक्षा अभावस्तथापराधश्च सर्वत्र वर्धन्ते। पूर्वैः विश्वविद्यालयानुदानायोगाध्यक्षप्रवरजां प्रो०. हरिगौतममहोदयानां प्रो० मुरलीमनोहर जोशीनाञ्च दिव्यदृष्ट्या समस्तप्रयोगात्मकविज्ञानानां मूलरूपज्यौतिर्विज्ञानस्य प्रवेशद्वारः सर्वाभिप्रायिकत्वेनोद्घाटितः। फलतः ज्यौतिषाद्भिन्नान्यविज्ञानस्य छात्राः साभारेण ज्यौतिषमूलेन युक्ताः सन्तः कालविद्यया ब्रह्माण्डस्योत्पत्तिस्थितिविनाशानामनन्तक्रमे स्वकीयक्षमतां ज्ञात्वा वर्धयित्वा च पुरुषार्थचतुष्टयेषु निष्णाताः भवितुमर्हन्ति नान्यथेति। यतः सत्तात्मकं द्वैतविश्वं त्रिगुणात्मकं पाञ्चभौतिकमस्त्यतः भौतिकादिनां विज्ञानान्यपि गणितेन गोलेन विमलबुद्ध्या यन्त्रेण च युक्तानि वेदाङ्गज्यौतिषस्यैव वाक्रुपाणीति। वराहस्य संहितोक्तप्रमाणैः नरपतिजयचर्यादिभिः प्रदर्शितयथार्थैः तथा भास्करीयप्रमाणैरपि यन्त्रस्य यन्त्राध्यायस्य महत्वं (त्रिस्कन्धज्यौतिषस्य परमावश्यकाध्यायरूपेण) निरूपितं स्वकीय यन्त्राध्याये यथा —

दिनगतकालावयवा ज्ञातुमशक्या यतो विना यन्त्रैः।
वक्ष्ये यन्त्राणि ततः स्फुटानि सङ्क्षेपतः कतिचित्।।

गोलो नाडीवलयं यष्टिः शङ्कुर्घटी चक्रम्।
चापं तुर्य फलकं धीरेकं पारमार्थिकं यन्त्रम्।।

अतः विभिन्नयन्त्राणि दिनगतकालावयवान्निरुपयितुं भास्करेण निरुपितानि तत्र धीयन्त्रस्य सर्वोत्कृष्ट

त्वं पारमार्थिकत्वञ्च प्रदर्शितमिदं तथ्यं सार्वकालिकमेव।

यतः सर्वविधमानानि, संस्थानसञ्चारादयः यन्त्रः वेधोपलब्धत्वात् विभिन्नकालिकप्रत्येकसिद्धान्ते तदयुगीयसैद्धान्तिकसामर्थ्यस्य यान्त्रिकसामर्थ्येन बौद्धिकविकासस्यैव सीमां दर्शयति। परवर्तीकाले भस्करीयमूलस्यैव समग्रविश्वे विकासो जातः। यन्त्रवेधेन दृग्गणितैक्यसम्पादनं सूक्ष्मकालज्ञानार्थं कालप्रभावकलनार्थञ्च परमावश्यकमेवेति यथा भास्करः —

यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम्
स्यात् प्रोच्यते तेन नभश्चरणं स्फुटक्रिया दृग्गणितैक्यकृद्या।।

अतः कालज्ञानं भगणज्ञानं गतिसंस्थानादीनां ज्ञानं कालान्तरप्रभावनिष्पत्या गत्या तापांशशीतांशाभ्यां त्रिगुणात्मकनिष्पत्या पाञ्चभौतिकप्रपञ्चे च चराचरात्मके विश्वेद्युनाभसभौमानां त्रिगोलीयनिष्पत्या सौरादारभ्य प्रसरति। कालपरिवर्तनेन सत्तापरिवर्तनं गतिः सञ्चारादिभिस्तथावस्थाभेदाश्च सम्पद्यन्ते। अतः ज्यौतिषं भूपृष्ठादारभ्य मानावादनन्तं यावत् सम्बद्धमिति प्रतीयते। अन्यथा किं वास्य मूलं को वा कथयितुं समर्थः न कोऽपि। ईश्वरांशभूतादेवास्य प्रकटीकरणादनन्तरं सर्वैः विश्वेतिहासाः खगोलीयचित्रैस्तत्सम्बद्धभूपृष्ठीयचित्रैश्च गम्याः सन्तीति विद्यावाचस्पति मधुसूदन ओझा तथा पं० दीनानाथ शास्त्रीचुलैट प्रभृतिभिः (कथं सम्बद्धमिति) सम्यक् निरुपितम्।

भास्करेण सर्वमूलत्वात् तीक्ष्णबुद्धिगम्यत्वादेव गणितज्ञानेन गणितीयप्रायुक्तया बुद्धिगम्यगणितस्यैव सर्वोत्कृष्टत्वं निरुपितम्।

यथा भास्करः —

ज्योतिः शास्त्रफलं पुराणगणकैरादेश इत्युच्यते
नूनं लग्नबलाश्रितः पुनरयं तत् स्पष्टखेटाश्रयम्।
ते गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न ज्ञायते
तस्माद्यो गणितं न वेत्ति स कथं गोलादिकं ज्ञास्यति।।

भास्करेण ब्रह्मगुप्तागमः स्वीकृतः बल्लालसेनेन वराहस्य तथा पुराणानामागम स्वीकृतम्। जयसिंहात्पूर्वं सौरपक्षः ब्राह्मपक्षः आर्यपक्षश्चासन्। इति।

# 25

# कालस्वरूपम्

*पि. पवन कुमार*

ज्योतिषं कालविधायकशास्त्रमिति सर्वे जानन्त्येव। अतः तादृशस्य कालविधानशास्त्रस्य स्वरूपं बहवो ज्येतिषशास्त्राचार्याः अकथयन्। ते ऋषयः ज्योतिषशास्त्रप्रवक्तारः। एते एव ज्योतिषशास्त्रस्य आधारभूतऋषयः। ते सर्वे ज्योतिषशास्त्रस्य प्रत्यङ्गं सुष्टु अकथयन्।

वेदचतुष्टयस्यापि प्रतिवेदं भिन्नं ज्योतिश्शास्त्रमुपलभ्यते, ऋग्ज्यौतिषं, यजुर्ज्यौतिषं, सामज्यौतिषं, अथर्वज्यौतिषञ्चेति। कालक्रमेण शास्त्रस्यास्य बहुविकासः समजनि। गच्छति काले इदञ्च शास्त्रं सिद्धान्त-संहिता-होरेति स्कन्धत्रयेण विभक्तम्। उक्तं च नारदेन —

सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्।<br>
वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमनुत्तमम्।। इति।

एवञ्च प्रश्नमार्गे —

जातकगोलनिमित्तप्रश्नमुहूर्ताख्यगणितनामानि।<br>
अभिदधतीह षडङ्गान्याचार्या ज्योतिषे महाशास्त्रे।।

इति च ज्यौतिषस्य षडङ्गत्वं एषु जातकादिषु आमनन्ति विद्वांसः। इदञ्च शास्त्रं इतोऽपि विराट्स्वरूपं सम्प्राप्य मनोविज्ञानचिकित्साशास्त्रादिभिरपि समृद्धमभूत्। सूक्ष्मेक्षिकया परिशील्यमाने स्कन्धत्रये एव सर्वेऽपि विचाराः विलीयन्ते।

## सिद्धान्तः

सिद्धान्तस्कन्धेऽस्मिन् आकाशस्थग्रहनक्षत्रादीनां स्थितिः, ग्रहाणां गतिविशेषः, ग्रहकक्षाः, अहर्गणानयनक्रमः, ग्रहस्पष्टीकरणप्रकारः,सूर्यचन्द्रयोर्ग्रहणमित्यादिविचारा उपवर्ण्यन्ते। एवमेव दिग्देशकालनिर्णयः सौरसावनादि नव मानभेदाः, ज्या साधनम्, चर-देशान्तरसंस्काराः इत्यादि-विषया अपि स्कन्धस्यास्य विचाराः।

कल्पादितः अहर्गणं संसाध्य यत्र ग्रहस्पष्टीकरणं क्रियते स सिद्धान्तः, यत्र च युगादितः अहर्गणमानीयते तत्तन्त्रमिति, तथा च कल्पितेष्टवर्षमारभ्य यस्मिन् अहर्गणमानीय ग्रहकर्म क्रियते तच्च करणमित्युदीर्यते। गणित-बीजगणित-रेखागणितमिति त्रिधा भिद्यते। बहुप्राचीनकाले एव भारतीयगणितज्ञाः गणितविषये महता प्रयत्नेन अनुसन्धानं कृत्वा बहूनंशान् प्रतिपादितवन्तः।

प्राचीनभारतीयज्यौतिषिकैराविष्कृतदशमलवपद्धतिः अधुनातनाधुनिकविज्ञानिभिरुपस्थापितः स सिद्धान्तः भास्कराचार्यैः सिद्धान्तशिरोमणिग्रन्थे स्पष्टं प्रतिपादितो दृश्यते। यथा —

आकृष्टिशक्तिष्टा मही तया यत्खस्थं गुरु स्वाभिमुखं स्वशक्त्या।
आकृष्यते तत्पततीव भाति समे समन्तात् क्व पतत्वियं खे।। इति।

नारदत्रिस्कन्धे एवमुक्तमस्ति।

गणिते परिकर्माणि खगमध्यस्फुटक्रिये।
अनुयोगष्टान्द्रसूर्यग्रहणं चोजयास्तकम्।।3।।

छाया श्रृङ्गोन्नतियुती पातसाधनमीरितम्।
— नारद त्रिस्कन्ध ज्योतिषे

आर्यभट्टस्य आर्यभटीयं, लल्लस्य धीवृद्धिदम्, ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तः, भास्कराचार्याणां सिद्धान्तशिरोमणिः, सूर्यसिद्धान्तः इत्यादयः प्रसिद्ध सिद्धान्तग्रन्थाः।

सिद्धान्तभागे अत्यन्तप्राचीनः प्रामाणिकग्रन्थः वर्तते सूर्यसिद्धान्तः। सूर्यसिद्धान्तस्य कर्तृविषये ज्योतिश्शास्त्राचार्येषु मतभेदाः दृश्यन्ते। परन्तु सूर्यांशपुरुषमयासुरयोः संवादरूपः ग्रन्थः अयमिति सूर्यसिद्धान्ते एव दृश्यते। तस्मिन्ग्रन्थे उक्तः कालस्वरुपविषयः मया अत्र प्रस्तूयते।

ग्रन्थोक्तरीत्या कालस्तु द्विविधः। सकलभुवनभूतानां संहारकारकः एकः कालः। सः तु अखण्डकालः। द्वितीयः कलनात्मकः कालः। कलनात्मके कालेऽपि वर्गद्वयम् वर्तते। स्थूलकालः सूक्ष्मकालष्टोति। व्यवहारे योग्यः स्थूलकालस्तु मूर्तकालः अपि च सूक्ष्मस्तु अमूर्तकालः इति उच्यते। तदेव अत्र

लोकानामन्तकृत् कालः कालोऽन्यः कलनात्मकः।
स द्विधा स्थूलसूक्ष्मत्वान्मूर्तष्टामूर्त उच्यते। इति

तत्र मूर्तकालः प्राणादयः, अमूर्तकालः त्रुट्यादयष्टा इति कथयन्त्याचार्याः।

प्राणादिः कथितो मूर्तस्त्रुष्ट्याद्योऽमूर्तसंज्ञकः। इति

अत्रापि मूर्तकालः पुनः उक्तः

षड्भिः प्राणैर्विनाडी स्यात् तत्षष्ठ्या नाडिका स्मृता।
नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम्।
तत् त्रिंशता भवेन्मासः सावनोऽर्कादयैस्तथा।। इति।

इत्युक्ते षड्प्राणाः एका विनाडिका। तादृश षष्टि विनाडिकाः एका नाडिका इत्युच्यते। षष्टि नाडिकास्तु एकं नक्षत्रमुच्यते। तन्नक्षत्रप्रमाणमेव अहोरात्रस्यापि कथयन्ति। एतादृशाहोरात्राणि त्रिंशत् एकः मासः भवति। सूर्योदयद्वयान्तर्गतः कालः एकं सावनदिनमित्युच्यते।

ऐन्दवस्तिथिभिस्तद्वत् सङ्क्रान्त्या सौर उच्यते।
मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते।।

तिथयः चान्द्रदिनानि भवन्ति। अतः अमान्तादमान्तं त्रिंशत्तिथयः एकः चान्द्रमासः। तथैव सङ्क्रान्तेः सङ्क्रान्तिं यावत् सूर्यस्य त्रिंशदंश-भोगकालः सौरमासः। एते सौरसावनचान्द्रमासाः द्वादश, एकं वर्षं भवति। तदस्माकं मानवानां एकं वर्षं देवानां एकं अहोरात्रं च भवति। तद्दिव्यदिनमिति कथ्यते।

एतत् दिव्यदिनमेव देवदैत्यानाम् अहोरात्रम् भवति। इत्युक्ते यत् देवानाम् दिनम् तत् असुराणाम् रात्रिः। यत् देवानाम् रात्रिः तदसुराणां दिनं भवति। तदैवात्र उक्तः

सुरासुराणामन्योऽन्यमहोरात्रं विपर्ययात्।
तत्षष्टिः षड्गुणा दिव्यं वर्षमासुरमेव च।। इति

दिव्यदिनानि यदि षष्ट्यधिकत्रिशतं भवन्ति चेत् तत् एकं दिव्यवर्षं भवति। तत् द्वादशसहस्राणि तु चतुर्युगं भवति। इत्युक्ते द्वादशसहस्राणि दिव्यवर्षाणि चतुर्युगाः भवन्ति। चतुर्युगा नाम कृत-त्रेता-द्वापर-कलियुगाः। एतानि चतुर्युगानि यदि सौरवर्षेषु वक्तव्यानि चेत् —

12,000 दिव्यवर्षाणि X 360 सौरवर्षाणि = 4,320,000 सौरवर्षाणि।

तद्द्वादशसहस्राणि चतुर्युगमुदाहृतम्।
सूर्याब्दसङ्ख्यया द्वित्रिसागरैरयुताहतैः।।

एतच्चतुर्युगमानं तु युगसन्धिसहितं भवति। यथा प्रतिदिनं दिनषष्ठांशमितं सन्ध्यामानं भवति तथैव कृत-त्रेता-द्वापर-कलिसंज्ञकयुग-चरणानामपि आद्यन्तयोः सन्ध्यासन्ध्यांशौ भवन्ति। कृतादीनां युगानामियं व्यवस्था युगीयधर्मचरणानुसारिणी इति ज्ञेया। यथा कृतयुगे धर्मस्य चत्वारः पादाः, त्रेतायुगे त्रयः भागाः, द्वापरे द्विभागौ, कलौ तु एकः एव धर्मपादः भवति। तदनुसृत्य युगानां मानं भवति। तदित्थं वदति

सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्।
कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया।। इति

युगस्य दशमो भागः पृथक् पृथक् चतुर्भिः, त्रिभिः, द्वाभ्याम्, एकेन च गुण्यते चेत् क्रमेण कृत-त्रेत-द्वापर-कलियुगानां मानं भवति। तम्मानं स्वस्वसन्ध्यासन्ध्यांशसहितमिति ज्ञेयः। तत् कथं नाम

युगप्रमाणं तु 12,000 दिव्यवर्षाणि x 10/4

= 4,800 दिव्यवर्षाणि कृतयुगम्।

युगप्रमाणं तु 12,000 दिव्यवर्षाणि x 10/3

= 3,600 दिव्यवर्षाणि त्रेतायुगम्।

युगप्रमाणं तु 12,000 दिव्यवर्षाणि x 10/2

= 2,400 दिव्यवर्षाणि द्वापरयुगम्।

युगप्रमाणं तु 12,000 दिव्यवर्षाणि x 10/1

= 1,200 दिव्यवर्षाणि कलियुगम्।

अधुना सन्धिमानगणना तु कृतयुगमानं 4,800/6 = 800 दिव्यवर्षाणि कृतयुगसन्धिभागः। तदपि 400 दिव्यवर्षाणि तु कृतादौ, 400 दिव्यवर्षाणि कृतान्ते च सन्धिर्भवति।

त्रेतायुगमानं 3,600/6 = 600 दिव्यवर्षाणि त्रेतायुगसन्धिभागः। तत्रापि 300 त्रेतायुगादौ, 300 त्रेतायुगान्ते च सन्धिभागः भवति।

द्वापरयुगमानं 2,400/6 = 400 दिव्यवर्षाणि द्वापरयुगसन्धिभागः। अत्र 200 द्वापरयुगादौ, अन्ते 200 दिव्यवर्षाणि च सन्धिः भवति।

कलियुगमानं 1,200/6 = 200 दिव्यवर्षाणि कलियुगसन्धिभागः। अत्रापि 100 कलियुगादौ, एवञ्च 100 कलियुगान्ते च सन्धिभागः भवति। एतदेव उक्तम् अत्र —

युगस्य दशमो भागष्टातुस्त्रिद्व्येकसङ्गुणः।
क्रमात् कृतयुगादीनां षष्ठांशः सन्ध्ययोः स्वकः।। इति

पूर्वोक्तमहायुगानां (द्वादशसहस्रदिव्यवर्षात्मकम्) एकसप्ततिः एकं मन्वन्तरं इति उच्यते। एकसप्ततिमहायुगमेको मनुस्तिष्ठतीत्यर्थः। एकैकस्य मनोरन्ते सन्धिकालः कृताब्दसंख्याकालः विद्यते। सन्धिकालेऽस्मिन् महीजलेन पूर्णा भवति। तदैवोक्तः —

युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते।
कृताब्दसङ्ख्यस्तस्यान्ते सन्धिः प्रोक्तो जलप्लवः।। इति ।

एकस्मिन् कल्पे स्वस्वसन्धिसहिताः मनवः चतुर्दश भवन्ति। ते के नाम स्वयंभुव, स्वारोचिष, उत्तम, तामस, रैवत, चाक्षुष, वैवस्वत, सावर्णि, दक्षसावर्णि, ब्रह्मसावर्णि, धर्मसावर्णि, रुद्रपुत्र, रौच्यष्टा, भौत्यकः इति चतुर्दशमनूनां नामानि।

कल्पादौ कृतयुगप्रमाणकालः सन्धिकालः स्मृतः। इत्युक्ते कल्पादौ कृतयुगकालानन्तरं प्रथमो मनुराविरभूदित्यर्थः। तेन कल्पे चतुर्दश-मनवस्तेषां पञ्चदश सन्ध्यष्टाभवन्ति तथैवोक्तः —

ससन्धयस्ते मनवः कल्पे ज्ञेयाष्टाचतुर्दश।
कृतप्रमाणः कल्पादौ सन्धिः पञ्चदशः स्मृतः।। इति ।।

तदेवं वदति —

इत्थं युगसहस्रेण भूतसंहारकारकः
कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती।।

ब्रह्मणः आयुः तावत् शतमहोरात्रं भवति। अर्थात् द्विशतकल्पाः ब्रह्मणः आयुः। अधुना ब्रह्मणः पञ्चाशत् अहोरात्राण्यतीतानि। एकपञ्चाशत्तमं दिनं प्रचलति।

परमायुः शतं तस्य त्वहोरात्रसङ्ख्यया।
आयुषोऽर्धमितं तस्य शेषकल्पोऽयमादिमः।।

# 26

# परमेश्वराचार्यविरचितायाः विवरणाख्यसूर्यसिद्धान्तव्याख्यायाः वैशिष्ट्यम्

*चित्तरञ्जननायकः*

**सूर्यसिद्धान्तः**

भारतीयगणितज्योतिषशास्त्रस्य मूलग्रन्थोऽस्ति सूर्यसिद्धान्तः।

अल्पाविशिष्टेतु कृते मयो नाम महासुरः।
रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम्।
वेदाङ्गमग्र्यमखिलं ज्योतिषं गतिकारणम्।
आराधयन् विवश्वन्तं तपस्तेपरे सुदुश्चरम्।

आभ्यां श्लोकाभ्यामवगम्यते-कृतयुगस्यान्तिमभागे मयनामकः कश्चन असुरः अस्य ग्रहनक्षत्रादि ज्योतिष्पिण्डानां गतिविषयकस्य रहस्यमवगमनाय सूर्यदेवं तपश्चचार। सूर्यदेवः मयस्य सुदुश्चरतपसा प्रीतः जातः। अनेन तपोबलेन मयासुरः सूर्यांशपुरुषविशेषात् शास्त्रमिदमलभत। अतो एनं ग्रन्थं केनापि पार्थिवपुरुषेण न रचितः। इदं भारतीयगणित-ज्योतिषस्य आर्षग्रन्थेति लोके सुप्रसिद्धः, सर्वमान्यश्च। "अल्पावशिष्टे तु कृते" इति पङ्क्तौ अनुमन्यते। अस्य ग्रन्थस्याविर्भावकालः 21,65,111 सौरवर्षेभ्यः पूर्वं नाम 21,600,000 BCE पूर्वमिति। अस्य ग्रन्थस्य मातृकाः (manuscripts) न केवलं भारतीयमातृकालयेषु अपितु विदेशे स्थितानां मातृकासङ्ग्रहालयेषु च संगृहिताः सन्ति। अयं पञ्चशतश्लोकविशिष्ट, चतुर्दशाधिकारैः विभक्तोऽस्ति। ग्रन्थस्यास्य पञ्चविंशत्यधिकानि व्याख्यानानि समुपलभ्यन्ते। तासु व्याख्यासु परमेश्वराचार्यस्य विवरणाख्या व्याख्या भिन्नास्ति।

**आचार्यपरमेश्वरः**

आचार्यपरमेश्वरः स्वीयकृतिषु कुत्रापि स्वस्य परिचयः न दत्तः। तेन विरचितदृग्गणितपुस्तके

स्वस्य रचनाकालः 1353 शकवर्षेनाम CE 1431 इति अवगम्यते। सूर्यसिद्धान्तस्य व्याख्यानादौ अस्य महात्मनः सामान्यपरिचयः परिलक्ष्यते। यथा —

व्याख्यातं भास्करीयं लघु तदनु महाभास्करीयं सभाष्यम्
पश्चाल्लीलावती च ग्रहगतिविषयं किञ्चिदन्यञ्च येन।
सोऽयं श्रीरूद्रशिष्यो वदनजशिशवे सूर्यसिद्धान्तसंस्थम्
वक्ष्यत्यस्पष्टमर्थगणितविषयकं कर्म तत्रैव हि स्यात्।।

श्लोकादस्मादवगम्यते परमेश्वरस्य लघुभास्करीय, महाभास्करीय लीलावत्यादि, गणितविषयानां व्याख्यानानि एवमन्यत् गणितविषयानां विरचनञ्च दृश्यते। अस्य महात्मनः गुरोर्नाम रुद्रदेवः। अयं वदनजशिशवे नाम ब्राह्मणपुत्रः इति ज्ञायते। एतद्भिन्नमपि आचारसङ्ग्रहः गोलदीपिका, ग्रहणान्यदीपिका, ग्रहणमण्डन ग्रहणाष्टक, चन्द्रच्छायागणितः, चातकपद्धति, दृग्गणित, वाक्यकरण, वाक्यदीपिका, विवाहानुकूल्यम्, षडवर्गफलादि परमेश्वरस्य स्वीयकृतयः, एवञ्च आर्यभटीय, जातककरण, मुहूर्तरत्न, लघुमानस, व्यतिपाताष्टक, षट्पञ्चाशिका, सूर्यसिद्धान्तादि-ग्रन्थानां व्याख्यानानि परमेश्वराचार्यस्य कृतयः विद्यन्ते। परमेश्वरस्य शिष्य नीलकण्ठस्य आर्यभट्टीयव्याख्याने अस्य महात्मनः परिचयः समुपलभ्यते। परमेश्वरोऽयं दक्षिणभारतस्य मालावरप्रदेशो नाम केरलप्रदेश-नीलनद्याः उत्तरभागेदशकलोनेकादशांशोत्तराक्षांशे (10'-50') — अष्टदशव्यङ्गुलाधिक द्वेऽङ्गुले विषुवद्भ्यां मध्यरेखातः पश्चिमभागे अष्टादशयोजनानि दूरे अश्वत्थग्रामे अस्य ग्रामस्याधुनिकनाम अलत्तुरग्रामे भार्गवगोत्रीय ब्राह्मणः आसीत्।

व्याख्यानमिदं त्रयोदशाध्यायैः अतीव सरलः, संक्षिप्तः, सुबोधगम्यश्चास्ति। ग्रहभगणाः, भूदिनस्वरुपम्, युगाधिमासादिविषयेषु भास्करीयप्रमाणस्य तोलनं दृश्यते। अतोऽनुमन्यते आचार्यपरमेश्वरः भास्कराचार्यस्य मतमङ्गीकृतवन्तः इति। सूर्यसिद्धान्तानुसारे कलियुगारम्भिक-ग्रहसंस्थितेः संशोधनमेव व्याख्यानस्यास्यातीव वैशिष्ट्यमस्ति।

ग्रहाणां गतिभेदवशात् कालान्तरे तेषां दृग्भेदो जायते। अतः कालतो मन्दफल-शीघ्रफलसंस्कारेणैव क्रमात् खेटानां सिद्धान्ताः सदैव परिवर्त्तनीयाः। तदर्थं आचार्यपरमेश्वरः सूर्यसिद्धान्तस्य व्याख्यानावसरे सूर्यसिद्धान्तोक्तकलियुगारम्भिको ग्रहाणां संशोधनं कृतं विद्यते। यथा —

कल्यादौ जातसंस्कारो ध्रुवरुपेण कथ्यते
अत्रैषामनुपातेन तैः कल्प्यश्चोर्ध्वकालतः।।

एवं कल्यादौ ग्रहसंस्कारः अग्रीमकाले तदनुपातिकः संस्कारः करणीयः। अत्र कल्यादौ ग्रहसंशोध्यांशाः प्रोक्ताः। यथा —

भानौ योज्या बाणकला विकलाश्चेषु बह्नयः।
लिप्ताद्वयं विधौ शोध्यं विलिप्ताश्च नागाग्नयः।।

तुङ्गे शोध्याश्चतुर्भागाः सप्तचन्द्रकला अपि।
विकला विश्वतुल्याश्च विकालान्तास्त्रयस्वामी।।

पञ्चलिप्ताः कुजे शोध्या बुधे वेदांशकस्तथा।
शोध्याश्शराब्धिलिप्ताश्च गुरौ भागत्रयं तथा।।

शोध्यं भृगौ वेदभागाश्शोध्या लिप्ताजिनैर्मिताः।
शनौ योज्या वेदभागास्सप्तलिप्तास्तथैव च।।

अत्र कलियुगारम्भिक ग्रहसंस्थितौ यथाक्रमम्
सूर्ये पञ्चकलाः पञ्चत्रिंशत् विकलाः योज्याः। (+5'37")
चन्द्रमसि द्वे कले सप्तत्रिंशत् विकलाः शोध्याः (-2'-37")
चन्द्रोच्चे चतुर्भागाः सप्तदशकलाः त्रयोदशविकलाश्च शोध्याः। (-4"/17'/13')
चन्द्रनीचे द्वौ भागौ पञ्चत्रिंशत्कलाः योज्याः। (+2°/3'5)
अङ्गारके पञ्चलिप्ताः शोध्याः। (-5')
वुधे चत्वारांशाः पञ्चचत्वारिंशत् कलाः विशोधनीयाः। (4°/45')
गुरौ त्रयांशाः शोध्याः। (-3°)
शुक्रे चत्वारांशाः चतुर्विंशतिकलाः शोध्याः (-4°/24')
शनौ चत्वारांशाः सप्तकलाः योज्याः (4°7')
योज्यं भागद्वयं पातमध्ये लिप्ताश्शराग्नयः।
दृक्साम्यसिद्धये कुर्यात् कल्यादौ ध्रुवका इति।।

अत्र कल्यादौ पातस्य संशोधनार्थमपि पञ्चत्रिंशत्कलाः अधिकाः अंशद्वयं (2° - 35') योजनीयमस्ति आचार्यस्य प्रमाणम्। अनेन संशोधनेन कल्यादौ ग्रहाणां पातस्य च ध्रुवकाः प्राप्यन्ते। एवमत्रास्य व्याख्यानस्य वैशिष्ट्यमुपलक्षते।

| ग्रहाः | सूर्यसिद्धान्तोक्त कलियुगारम्भिक राश्यादि ग्रहाः | | | | ग्रहाशोध्यांशाः | | | ग्रहाणां संशोधित भागाः | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | राशि | अंश | कला | विकला | | | | रा | अ | क | वि |
| रविः | 00 | 00° | 00' | 00" | +5 | | 35" | 0 | 0° | 5' | 35" |
| चन्द्रः | 00 | 00° | 00' | 00" | −2' | | 37" | 11 | 29° | 57' | 23" |
| चन्द्रोच्चः | 03 | 00° | 00' | 00" | −4° | 17' | 13" | 02 | 25° | 42' | 47" |
| चन्द्रनीचः | 06 | 00° | 00' | 00" | +2° | 35' | 00" | 06 | 02° | 35' | 00" |
| कुजः | 00 | 00° | 00' | 00" | −00° | 05' | 00" | 11 | 29° | 55' | 00" |
| बुधः | 00 | 00° | 00' | 00" | −04° | 45' | 00" | 11 | 25° | 15' | 00" |
| गुरुः | 00 | 00° | 00' | 00" | −03° | 00' | 00" | 11 | 27° | 00' | 00" |
| शुक्रः | 00 | 00° | 00' | 00" | −04° | 24' | 00" | 11 | 25° | 36' | 00" |
| शनिः | 00 | 00° | 00' | 00" | +04° | 07' | 00" | 0 | 04° | 7' | 00" |

# 27

## अहर्गणानयनम्

*गोविन्द प्रसाद शर्मा*

अह्नानां दिनानां गणः समूहोऽहर्गणः इत्युच्यते। अतः इदानीं सर्वेषां मनसि जिज्ञासा जायते अहर्गणस्य प्रयोजनं किम्? अतः उक्तं सूर्यादिग्रहाणां स्पष्टीकरणार्थं, तिथ्यादिपञ्चाङ्गसाधनार्थं ग्रहणादिस्पष्टीकरणार्थं सृष्ट्यारम्भकालज्ञानार्थं पृथिव्याः उत्पत्तिकालदर्शनार्थम् आवश्यकता भवति यथा — जीवस्याधारेण जीन्स्परीक्षाधारेण च वैज्ञानिकास्तस्यायुषो निर्धारणं कुर्वन्ति। तथैव दैवज्ञैः अहर्गणविधिना ग्रहोदयास्ताः स्पष्टीकरणार्थं आचार्यैः निर्दिष्टाः।

अहर्गणः चान्द्रसावननाक्षत्रसौरभेदाश्चतुर्विधोऽस्ति, तत्र चान्द्रसौरनाक्षत्रादीनां कदा आदि-प्रारम्भः कदा पूर्तिरिति युक्तिमन्तरा प्रत्यक्षाभावात् सावनदिनस्य सूर्योदयसमये प्रारम्भविरामयोः प्रत्यक्षावलोकनात् ग्रहादि-साधनाय सर्वैः प्राचीनैराचार्यैः सावनात्मकः अहर्गणः साधितः। तत्र सौरचान्द्रमसोरन्तरमधिदिनानि चान्द्रसावनयोरन्तरं क्षयदिनानि उच्यन्ते। अर्थात् सूर्योदयसमये एव रविचन्द्रौ मेषादिस्थो जाताविति तावत् कल्प्यते। तदा युगपत् सौरसावनचान्द्रनाक्षत्रादीनां प्रवृत्तिर्जायतेति सुविदितं सर्वेषां तदानीं रविः राश्यादिगतत्वात् सौरदिनादि। उदयायुदयं भानोः भूमिसावनवासर इति उक्तं सूर्यसिद्धान्ते। अयमेव सावनदिनादिः यन्नक्षत्रं तदानीमुदयतिथिजात्य-तदुदयान्नक्षत्रदिनादिः रविचन्द्रयोरेकत्र गतत्वात् तदानीं दर्शः सूर्येन्दुसङ्गमः इति लक्षणेन अमान्तकालघटनाच्चान्द्रदिनादिः जातः।

तत्र द्वादशसौरमासानां वर्षसंज्ञात्वात् कल्पादितः गतवर्षसंख्यया द्वादशगुणिताः अभीष्टवर्षादौ सौरमासा भवन्ति। तेषु चैत्रादिगत-चान्द्रमासतुल्याः सौरमासाः योज्यन्ते। सौरमासाः तदा ते अभीष्ट-संक्रान्त्यवधिकाः सौरमासाः भवन्ति। परन्तु ते दर्शसंक्रान्तिकालयोरन्तर्वर्तिनाधिमासाशेषेणाधिका भवन्ति। अतः दर्शाग्रतः संक्रमकालतः प्राक् सदैव तिष्ठत्याधिमासाशेषमिति उक्तमावश्यकम्। इत्युक्तेः तेषां सौरमासानां चान्द्रमासकरणार्थमधिमासानयनं प्रतिपादितम्। यदि पठितयुगसौरमासैः पठितकल्पादिमासस्तैरिष्टसौरमासैः कः इति।

कल्पाधिमासाः X इष्टसौरमासाः　　　　　　　　अधिशेष
कल्पसौरमासाः　　　　　　　　　　　　　　क.सौ.मा.

तत्राभ्यामधिमासाऽधिशेषाभ्यां युताः क्रियन्ते तदा गतसौरमासाः गतसौरवर्षान्ते चान्द्रमासाः भवन्ति। अर्थात् अभीष्टास्त्वमान्तकालिकाः अतोऽमान्त संक्रान्ति कालयोर्मध्ये अधिशेषं तिष्ठन्ति, उतोऽधिशेषेण हीनाश्चान्द्रमासाः अमान्तकालिकाः सिद्ध्यन्ति। यथा —

गतसौरमासाः गताधिमासाः अधिशेषम् - अधिशेषम्

चैत्रामान्ते चान्द्रमासाः अत्र अधिशेषस्येकत्र योजनम् अपरत्र शोधनं क्रियते। अतः तत्त्याग एव वरम्। पुनश्च चान्द्रमासस्त्रिंशद्गुणिता दर्शान्ते चान्द्रः दिवसाः (तिथयः) भवन्ति। तेषु दर्शान्तादिष्ट-दिनावधिका या गततिथयः ताः यदि योज्यन्ते तदा गततिथ्यन्तकालिक-चान्द्रदिनानि भवेयुः। अतः तेषां चान्द्रदिनानां सावनदिनकरणार्थमवमानयनं क्रियते। अत्र अवमः अर्थात् क्षयदिवसाः यदि पठितकल्पचान्द्रदिनैः कल्पक्षयदिनानि लभ्यन्ते तदा अभीष्टकान् इति।

कल्पक्षयदिनानि　　इष्टचान्द्रदिनानि　　क्ष. शे.
कल्पचान्द्रदिनानि　　　　　　　　　　　का.चा.दि.

तत्राऽऽभ्यां विशोधिताभीष्टचान्द्रदिनानि तिथ्यन्ते सावनदिनानि भवन्ति। किन्त्वपेक्षितास्तु सूर्योदयकालिकेऽतः "तिथ्यन्तसूर्योदययोऽस्तु मध्ये सदैव तिष्ठत्यवमावशेषम् " उक्तं च भास्कराचार्येण इत्युक्ते लक्षणात् तिथ्यन्तकालिक-सावनोऽहर्गणे क्षयशेषस्य योजनेन सूर्योदयकालिक-सावनाहर्गणो भवति। अर्थात् अभीष्टचान्द्रदिनानि-प्राप्तक्षयदिनानि-क्षयशेषं क्षयशेषम्।

